**GUJARAT AYURVED UNIVERSITY - JAMNAGAR**
**SANSKRIT SAMHITA SIDDHANT DEPARTMENT**
**QUESTION BANK**
**SANSKRIT AND HISTORY OF AYURVEDA**
**SANSKRIT PAPER - 1**
**(SUBJECT CODE- AyUG-SN&AI)**

## Q1 Multiple choice Questions (MCQ) (20 Questions 1 mark each All compulsory)

### TOPIC NO.1 (संस्कृतवर्णानाम् परिचयः)

(१) लघुसिद्धान्तकौमुदी ग्रन्थस्य रचना कः कृतवान् ?

(१) पाणिनि (२) प.विष्णुशर्मा **(३) वरदराज** (४) भट्टोजिदीक्षित

(२) भट्टोजिदीक्षितस्य शिष्यः कः ?

**(१) वरदराजाचार्य:** (२) नागेशभट्टः (३) स्वामी (४) श्रीधरानन्दः

(३) वरदराजाचार्येण कस्य ग्रन्थस्य कठिनत्वात् लघुसिद्धान्तकौमुदी रचिता ?

(१) प्रक्रियासर्वस्वस्य (२) प्रक्रियाकौमुद्याः

(३) रूपावतारस्य **(४) सिद्धान्तकौमुद्याः**

(४) वरदराजाचार्यस्य कः समयः ?

(१) 1605-1655 (२) 1640-1690 **(३) 1601-1650** (४) 1612-1652

(५) वरदराजाचार्यस्य पितुः नाम किम् ?

(१) रामदासः (२) चन्द्रदासः **(३) दुर्गातनयः** (४) चन्दनदासः

(६) वरदराजाचार्यस्य गुरोः नाम किम् ?

(१) वामनः (२) जयादित्यः (३) भट्टाचार्य: **(४) भट्टोजिदीक्षितः**

(७) अष्टाध्यायी कस्य रचना वर्तते ?

**(१) पाणिनि** (२) प.विष्णुशर्मा (३) वरदराज (४) भट्टोजिदीक्षित

(८) How many Sutra's in 'अष्टाध्यायी' ?

(१) 3796 (२) 3897 **(३) 3996** (४) 3797

(९) How many sutras in माहेश्वरसूत्राणि ?

(१) १८ **(२) १४** (३) १५ (४) १६

(१०) माहेश्वरसूत्रेषु स्वराणां संख्या अस्ति –

**(१) नव** (२) दश (३) एकादश (४) द्वादश

(११) माहेश्वरसूत्रेषु व्यञ्जनानां संख्या अस्ति –

(१) एकत्रिंशत् **(२) त्रयस्त्रिंशत्** (३) पञ्चत्रिंशत् (४) षड्त्रिंशत्

(१२) अच् प्रत्याहारसम्बद्धानि कति माहेश्वरसूत्राणि ?

**(१) चत्वारि** (२) षट् (३) नव (४) दश

(१३) हल्प्रत्याहार सम्बद्धानि कति माहेश्वरसूत्राणि ?

(१) चत्वारि (२) षट् (३) नव **(४) दश**

(१४) माहेश्वरसूत्रेषु कस्य वर्णस्य द्विरुच्चारणमस्ति –

(१) क् **(२) ह्** (३) म् (४) ल्

(१५) माहेश्वरसूत्रेषु कति इत्संज्ञकवर्णाः सन्ति ?

(१) चतुर्दश **(२) पञ्चदश** (३) त्रयोदश (४) दश

(१६) माहेश्वर सूत्राणां प्रवर्तको वर्तते ?

(१) शिवः **(२) पाणिनिः** (३) पतञ्जलि (४) ब्रह्मा

(१७) माहेश्वर सूत्राणां अपरा का संज्ञा वर्तते ?

**(१) प्रत्याहार सूत्राणि** (२) पाणिनिं सूत्राणि

(३) पातञ्जलि सूत्राणि (४) पदसंज्ञासूत्राणि

(१८) हकारादिषु अकारः किमर्थं ?

(१) शोभनार्थम् (२) मङ्गलार्थम् **(३) उच्चारणार्थम्** (४) पूरणार्थम्

(२०) उपदेशः वर्तते

(१) समाहारः (२) संहिता (३) संयोगः **(४) आद्योच्चारणम्**

(२१) वार्तिककार: कः वर्तते?

(१) भर्तृहरिः (२) पाणिनिः **(३) कात्यायनः** (४) रामचन्द्रः

(२२) माहेश्वरसूत्रेषु अन्तिमवर्णस्य संज्ञा का भवति ?

(१) वृद्धि संज्ञा (२) गुण संज्ञा **(३) इत् संज्ञा** (४) लोप संज्ञा

(२३) माहेश्वरसूत्रेषु कति वर्णाः ( स्वराः+व्यञ्जन) सन्ति ?

**(१) द्विचत्वारिंशत्** (२) पञ्चदशः (३) त्रिषष्टिः (४) चत्वारिंशत्

(२४) माहेश्वरसूत्रेषु नास्ति?

(१) अइउण् **(२) हलन्त्यम्** (३) एओच् (४) हयवरट्

(२५) अच्.........|

**(१) स्वराः** (२) व्यञ्जनानि (३) प्रत्याहाराः (४) वर्णाः

(२६) हल्.........|

(१) स्वराः **(२) व्यञ्जनानि** (३) प्रत्याहाराः (४) वर्णाः

(२७) माहेश्वरसूत्रेषु प्रथमः वर्णः कः ?

**(१) अ** (२) इ (३) ओ (४) आ

(२८) वर्गाणां चतुर्थवर्णः माहेश्वरसूत्रेषु कस्मिन् क्रमे प्रयुक्ताः सन्ति ?

(१) सप्तम अष्टमश्च **(२) अष्टमः नवमः च**

(३) नवमः व दशमः (४) दशमः व एकादशः

(२९) How Many Types of उच्चारणस्थानानि according toलघुसिद्धान्तकौमुदी ?

**(१) 10** (२) 11 (३) 12 (४) 13

(३०) अ-कु-ह- विसर्जनीयानं...............|

**(१) कण्ठः** (२) तालु (३) मूर्धा (४) दन्ताः

(३२) इ-चु-य-शानां..........|

(१) कण्ठः **(२) तालु** (३) मूर्धा (४) दन्ताः

(३३) ऋ-टु-र-षाणां..........|

(१) कण्ठः (२) तालु **(३) मूर्धा** (४) दन्ताः

(३४) लृ-तु-ल-सानां..........|

(१) कण्ठः (२) तालु (३) मूर्धा **(४) दन्ताः**

(३५) उ-पु-उपध्मानीयानाम्..........|

**(१) ओष्ठौ** (२) तालु (३) मूर्धा (४) दन्ताः

(३६) ञ-म-ङ-ण-ना-नां.................च |

(१) ओष्ठौ (२) तालु (३) मूर्धा **(४) नासिका**

(३७) एदैतोः..........|

(१) कण्ठः (२) तालु **(३) कण्ठतालु** (४) कण्ठोष्ठम्

(३८) ओदौतोः ............|

(१) कण्ठः (२) तालु (३) कण्ठतालु **(४) कण्ठोष्ठम्**

(३९) वकारस्य.........|

**(१) दन्तोष्ठम्** (२) दन्ताः (३) कण्ठतालु (४) कण्ठोष्ठम्

(४०) जिह्वामूलीयस्य..............|

**(१) जिह्वामूलम्** (२) तालु (३) कण्ठतालु (४) कण्ठोष्ठम्

(४१) नासिका...........|

(१) जिह्वामूलम् **(२) अनुवारस्य** (३) कण्ठतालु (४) कण्ठोष्ठम्

(४२) चवर्गस्य उच्चारणं स्थानं वर्तते?

**(१) तालु** (२) मूर्धा (३) जिह्वा (४) कण्ठः

(४३) पवर्गस्य उच्चारणं स्थानं वर्तते?

**(१) ओष्ठौ** (२) मूर्धा (३) जिह्वा (४) कण्ठः

(४४) कवर्गस्य उच्चारणं स्थानं वर्तते?

(१) तालु (२) मूर्धा (३) जिह्वा **(४) कण्ठः**

(४५) टवर्गस्य उच्चारणं स्थानं वर्तते?

(१) तालु **(२) मूर्धा** (३) जिह्वा (४) कण्ठः

(४६) तवर्गस्य उच्चारणं स्थानं वर्तते?

**(१) दन्ताः** (२) मूर्धा (३) जिह्वा (४) कण्ठः

(४७) 'ध्' वर्णस्य उच्चारणस्थानम् अस्ति |

(१) ओष्ठौ **(२) दन्ता** (३) तालु (४) मूर्धा

(४८) 'थ्' वर्णस्य उच्चारणस्थानम् अस्ति |

(१) मूर्धा (२) ओष्ठौ (३) कण्ठ **(४) दन्ता**

(४९) 'ओ' वर्णस्य 'औ' वर्णस्य च उच्चारणस्थानम् अस्ति |

(१) कंण्ठ तालु (२) कण्ठ- नासिका (३) कण्ठ-जिह्वा **(४) कण्ठोष्ठम्**

(५०) .ऋकारस्य उच्चारणस्थानम् अस्ति |

**(१) मूर्धा** (२) तालु (३) कण्ठः (४) दन्ताः

(५१) वकारस्य उच्चारणस्थानम् अस्ति |

(१) कण्ठोष्ठौ **(२) दन्तोष्ठौ** (३) जिह्वामूल (द) दन्ताः

(५२) 'न्' वर्णस्य उच्चारणस्थानम् अस्ति |

(१) ओष्ठौ **(२) दन्तः** (३) नासिका (४) कण्ठः

(५३) .'आ' वर्णस्य उच्चारणस्थानम् अस्ति |

(१) दन्ताः (२) तालु (३) नासिका **(४) कण्ठः**

(५४) 'ई' वर्णस्य उच्चारणस्थानम् अस्ति|

**(१) तालु** (२) मूर्धा (३) दन्ताः (४) ओष्ठौ

(५५) रकारस्य उच्चारणस्थानम् अस्ति |

(१) तालु **(२) मूर्धा** (३) ओष्ठौ (४) कंण्ठः ।

(५६) लकारस्य उच्चारणस्थानम् अस्ति |

(१) ओष्ठौ **(२) दन्तः** (३) तालु (४) कण्ठोष्ठौ ।

(५७) उच्चारणस्थानानि कति सन्ति?

**(१) १०** (२) ६ (३) ७ (४) ८

(५८) कस्य वर्णस्य स्थानं दन्तोष्ठम् अस्ति ?

(१) छ् (२) झ् **(३) व्** (४) ए

(५९) श, ष, स, ह वर्णा ।

(१) स्वरवर्णा **(२) ऊष्मवर्णा** (३) अन्तस्थवर्णा (४) व्यंजनवर्णा

(६०) यत्नो द्विघा - .............|

(१) आभ्यन्तर (२) बाह्य **(३) आभ्यन्तरः बाह्यश्च** (४) कोऽपि नास्ति

(६१) उच्चारणे बाह्यप्रयत्न: कतिविधः?

**(१) एकादश** (२) द्वादश (३) पञ्च (४) दश

(६२) How Many Types of बाह्यप्रयत्न ?

(१) 10 **(२) 11** (३) 12 (४) 13

(६३) How Many आभ्यन्तर प्रयत्न according to लघुसिद्धान्तकौमुदी ?

(१) 4 **(२) 5** (३) 6 (४) 7

(६४) उच्चारणे आभ्यन्तरप्रयत्न: कतिविधः?

(१) एकादश (२) द्वादश **(३) पञ्च** (४) दश

(६५) स्वराणाम् आभ्यन्तरप्रयत्नं किम्?

(१) स्पृष्टम् (२) ईषत्स्पृष्टम् **(३) विवृतं** (४) संवृतम्

(६६) स्पर्शानाम् आभ्यन्तरप्रयत्नं किम्?

**(१) स्पृष्टम्** (२) ईषत्स्पृष्टम् (३) विवृतं (४) संवृतम्

(६७) अन्तःस्थानानाम् आभ्यन्तरप्रयत्नं किम्?

(१) स्पृष्टम् **(२) ईषत्स्पृष्टम्** (३) विवृतं (४) संवृतम्

(६८) ऊष्माणाम् आभ्यन्तरप्रयत्नं किम्?

(१) स्पृष्टम् (२) ईषत्स्पृष्टम् **(३) ईषद्विवृतं** (४) संवृतम्

(६९) अन्तःस्था कति सन्ति ?

**(१) ४** (२) ६ (३) ७ (४) ८

(७०) ऊष्मवर्णानां सङ्ख्या कति सन्ति ?

**(१) ४** (२) ६ (३) ७ (४) ८

(७१) कति स्पर्शवर्णाः ?

(१) पञ्च (२) दश **(३) पञ्चविंशतिः** (४) चत्वारः

(७२) ह्रस्वस्य 'अ' वर्णस्य प्रयोगे..........|

(१) स्पृष्टम् (२) ईषत्स्पृष्टम् (३) विवृतं **(४) संवृतम्**

(७३) कादयो मावसानाः ..............|

(१) ऊष्माः (२) स्वराः (३) अन्तःस्थाः **(४) स्पर्शाः**

(७४) ......... विवाराः श्वासा अघोषाश्च |

**(१) खरः** (२) हशः (३) हलः (४) अचः

(७५) .......... संवारा नादा घोषश्च |

**(१) हशः** (२) हलः (३) शलः (४) अचः

(७६) वर्गाणां प्रथम-तृतीय-पञ्चमा यणःच ............|

**(१) अल्पप्राणाः** (२) माहाप्राणाः (३) घोषाः (४) अघोषाः

(७७) वर्गाणां द्वितीय-चतुर्थौ शलः च ............|

(१) अल्पप्राणाः **(२) महाप्राणाः** (३) घोषाः (४) अघोषाः

(७८) .......... अन्तःस्थाः|

(१) हशः (२) हलः (३) शलः **(४) यणः**

(७९) ...........ऊष्माणः |

(१) हशः (२) हलः **(३) शलः** (४) यणः

(८०) कः स्वरः संवृतः-

(१) एकारः (२) उकारः (३) इकारः **(४) अकारः**

(८१) प्रक्रियादशायां तुं ...................

(१) सवृतमेव (२) स्पृष्टमेव **(३) विवृत्तमेव** (४) स्वराणाम्

(८२) अधस्तनेषु शब्देषु अन्तस्थः वर्णः कः?

(१) अ (२) ट **(३) र** (४) च

(८३) अधोदत्तेषु कः प - वर्णस्य बाह्यप्रयत्नः नास्ति।

(१) विवार: **(२) घोष:** (३) अघोषः (४) श्वास:

(८४) कस्य वर्णस्य आभ्यन्तरप्रयत्नः संवृतम् अस्ति?

(१) ब (२) ग **(३) अ** (४) उ

(८५) 'घोष' वर्णाः सन्ति-

**(१) ग, घ, ङ** (२) त, क, न (३) य, र, त (४) न, ङ, क।

(८६) स्वस्यचिह्नम्.................|

**(१) अस्ति** (२) नास्ति (३) भवतु (४) स्यात्

## TOPIC NO.2 (संज्ञा)

(८७) वृद्धि संज्ञा विधायकं सूत्रं वर्तते?

(१) वृद्धिरेचि (२) अदेङ्गुणः **(३) वृद्धिरादैच्** (४) आद्गुणः

(८८) गुण संज्ञा विधायकं सूत्रं वर्तते?

(१) वृद्धिरेचि **(२) अदेङ्गुणः** (३) वृद्धिरादैच् (४) आद्गुणः

(८९) उपसर्ग संज्ञा विधायकं सूत्रं वर्तते?

(१) गति (२) प्रादयः (३) वृद्धिरेचि **(४) उपसर्गाः क्रियायोगे**

(९०) अ-ए-ओ संज्ञा भवति-

**(१) गुणः** (२) वृद्धिः (३) टि (४) गति

(९१) आ-ऐ-औ संज्ञा भवति-

(१) गुणः **(२) वृद्धिः** (३) टि (४) गति

(९२) लोपसंज्ञा विधायकं सूत्रं वर्तते?

(१) वृद्धिरेचि (२) अदेङ्गुणः **(३) अदर्शनं लोपः** (४) हलन्त्यम्

(९३) सूत्रेषू ................... पदं सूत्रान्तराद् अनुवर्तीयं सर्वत्र।

(१) दृष्टम् **(२) अदृष्टम्** (३) हलन्त्यम् (४) लोप:

(९४) प्रसक्तस्यादर्शनम् ..................... संज्ञ:स्यात्।

**(१) लोप:** (२) इत् (३) प्रत्याहार (४) सवर्ण:

(९५) उदात्तसंज्ञा विधायकं सूत्रं वर्तते?

(१) समाहारः स्वरितः **(२) उच्चैरुदात्तः** (३) नीचैरनुदात्तः (४) वृद्धिरेचि

(९६) ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नः अच्............संज्ञः स्यात्|

**(१) उदात्तः** (२) स्वरितः (३) अनुदात्तः (४) दीर्घः

(९७) ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नः अच्............संज्ञः स्यात् |

(१) उदात्तः (२) स्वरितः **(३) अनुदात्तः** (४) दीर्घः

(९८) उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यत्र सोऽच् अच्............संज्ञः स्यात् |

(१) उदात्तः **(२) स्वरितः** (३) अनुदात्तः (४) दीर्घः

(९९) ह्रस्वदीर्घप्लुतस्वराणां वर्गीकरण केषु भवन्ति ?

(१) उदात्त (२) अनुदात्त (३) स्वरित **(४) उदात्-अनुदात्- स्वरित**

(१००) अनुदात्तसंज्ञा विधायकं सूत्रं वर्तते

(१) समाहारः स्वरितः (२) उच्चैरुदात्तः **(३) नीचैरनुदात्तः** (४) वृद्धिरेचि

(१०२) स्वरित संज्ञा विधायकं सूत्रं वर्तते?

**(१) समाहारः स्वरितः** (२) उच्चैरुदात्तः (३) नीचैरनुदात्तः (४) वृद्धिरेचि

(१०३) द्विमात्रिकस्य वर्णस्य का संज्ञा ?

(१) उदात्तः (२) प्लुतः **(३)** अनुदात्तः (४) **दीर्घः**

(१०४) एकमात्रिकस्य वर्णस्य का संज्ञा ?

**(१) ह्रस्व** (२) प्लुतः (३) अनुदात्तः (४) दीर्घः

(१०५) त्रिमात्रिकस्य वर्णस्य का संज्ञा ?

(१) उदात्तः **(२) प्लुतः** (३) अनुदात्तः (४) दीर्घः

(१०६) अष्टादश भेदाः कस्य ?

(१) धातुनां (२) सूत्राणां (३) रूपाणां **(४) वर्णानां**

(१०७) पद संज्ञा विधायकं सूत्रं वर्तते?

(१) अदर्शनं लोपः (२) उच्चैरुदात्तः

(३) आदिरन्त्येन संहिता **(४) सुप्तिङन्त पदम्**

(`१०८) Which of the Following is a पदसंज्ञा ?

**(१)** सुप् (२) तिङ् (३) **A&B Both** (४) None of the Above

(१०९) Tiganta the suffix is witch sangna ?

(१) निपातः **(२) धातवः** (३) पदम् (४) प्रगृह्य

(११०) तुल्यास्यप्रयत्नं किं करोति?

**(१) सवर्णम्** (२) असवर्णम् (३) उदात्त: (४) प्रातिपदिकः

(१११) इत् संज्ञा विधायकं सूत्रं वर्तते?

(१) वृद्धिरेचि (२) अदेङ्गुणः (३) अदर्शनं लोपः **(४) हलन्त्यम्**

(११२) परः सन्निकर्षः किमुच्यते व्याकरण शास्त्रे ?

(१) सन्निकर्षः प्रकर्षः (२) सन्निकर्षःसंधिः

(३) परः सन्निकर्षः निष्कर्षः **(४) परः सन्निकर्षः संहिता**

(११३) आदिरन्त्येनसहेता………. संज्ञा भवति|

(१) संयोगः (२) लोपः (३) धातवः **(४) प्रत्याहारः**

(११४) प्रतीयतेः विधियते इति**----.**

(१) प्रत्यय: **(२) प्रत्याहारः** (३) स्वर्णसंज्ञः (४) None

(११५) प्रत्याहाराणि कति विधानि ?

(१) एकचत्वारिंशत् (२) द्विचत्वारिंशत् (३) त्रयोचत्वारिंशत् **(४) चतुःचत्वारिंशत्**

(११६) सरल स्वर ______ प्रत्याहार |

**(१) अक्** (२) अच् (३) एच् (४) ऐच्

(११७) संयुक्त स्वरः ________ |

(१) अक् (२) अच् **(३) एच्** (४) हल्

(११८) ‘शल्' प्रत्याहारान्तर्गताः वर्णाः सन्ति |

(१) श् ष् स् **(२) श् ष् स् ह्** (३) क् प् श् ष् स् ह् (४) ज् ब् ग् ड् द्।

(११८) ‘यण्' प्रत्याहारान्तर्गताः वर्णाः सन्ति |

(अ) ह्य् व् र् ल्.. (२) श् ष् स् ह **(३) य् व् र् ल्** (४) ज् ब् ग् ड् द्।

(११९) इक्’ प्रत्याहारान्तर्गताः वर्णाः सन्ति|.

(१) अ, इ, उ (२) अ, इ, उ, ऋ, लृ (३) ए, ओ, ऐ, औ **(द) इ, उ, ऋ, लृ।**

(१२०) 'हल्' प्रत्याहारस्य वर्णाः कथ्यन्ते |

(१) स्वरं (२) स्पर्श **(३) व्यञ्जन** (४) ऊष्म।

(१२१) Which Word can not be applicable in हल्प्रत्याहार?

**(१) अ** (२) च (३) क (४) ङ्

(१२२) How Many Letters in अच्प्रत्याहार ?

(१) 6 (२) 7 (३) 8 **(४) 9**

(१२३) Suffix in सुप्प्रत्याहार ?

(१) 19 (२) 20 **(३) 21** (४) 22

(१२४) संयोगः संज्ञा विधायकं सूत्रं वर्तते?

**(१) हलोऽनन्तरा** (२) उच्चैरुदात्तः (३) नीचैरनुदात्तः (४) वृद्धिरेचि

(१२५) अधस्तनेषु संयोगपदं चिनोतु।

(१) कमलम् (२) सागरः (३) **याज्ञवल्क्यः** **(४)** नयनम्

(१२६) भूवादयो........|

(१) निपातः **(२) धातवः** (३) पदम् (४) प्रगृह्य

(१२७) मुखनासिकावचनः.........|

**(१) अनुनासिकः** (२) धातवः (३) पदम् (४) प्रगृह्य

(१२८) ईदूदेद्द्विवचनं भवति-

(१) अनुनासिकः (२) धातवः (३) टि **(४) प्रगृह्य**

(१२९) केषां वर्णानाम् उदात्त-अनुदात्त-स्वरित संज्ञा भवन्ति?

**(१) स्वरवर्णानाम्** (२) व्यञ्जनवर्णानाम्

(३) अन्तःस्थवर्णानाम् (४) कोऽपि नास्ति

(१३०) अ,इ,उ,ऋ, वर्णानां प्रत्येकस्य भेदाः भवन्ति?

**(१) १८** (२) १५ (३) १६ (४) १२

(१३१) ए,ऐ,ओ,औ वर्णानां प्रत्येकस्य भेदाः भवन्ति?

(१) १८ (२) १५ (३) १६ **(४) १२**

(१३२) 'लृ' वर्णस्य कति सवर्णभेदाः ?

(१) १८ (२) १५ (३) १६ **(४) १२**

(१३३) ऋऌवर्णयोमिथः सावर्ण्यं वाच्यम् - वार्तिकम् - which Maharshi Suggested?

(१) पाणिनि (२) भट्टोजीदिक्षित (३) वरदराज **(४) कात्यायन**

(१३४) चादयः .......|

(१) अनुनासिकः (२) धातवः **(३) निपातः** (४) प्रगृह्य

(१३५) एच्,अक्,हल्,यल्,जश् इति.................|

(१) स्वराः (२) व्यञ्जनानि **(३) प्रत्याहाराः** (४) वर्णाः

## TOPIC NO.5 (कारकप्रकरणम्)

(१३६) क्रियान्वितं .........|

(१) धातुः (२) पदम् **(३) कारकम्** (४) निपातः

(१३७) ............सह अन्वितं कारकं कथ्यते|

**(१) क्रियया** (२) विशेषेण (३) कर्तृपदेन (४) समासेन

(१३८) कारकाणां संख्या अस्ति-

(१) सप्त (२) अष्ट **(३) षट्** (४) दश

(१३९) .........विभक्तेः कारकत्वं नास्ति |

(१) पञ्चमी **(२) षष्ठी** (३) द्वितीया (४) चतुर्थी

(१४०) क्रियायाः केन साक्षात्-सम्बन्धोऽस्ति?

(१) पदेन **(२) कारकेण** (३) विशेषेण (४) समासेन

(१४१) कारक-विभक्तयः यत्र सहजमन्तर्भवति तदुच्यते-

(१) तुमुन् (२) तृच् **(३) सुप्** (४) तद्धिताः

(१४२) उपपदविभक्तेः............. बलीयसी-

(१) अनुपपदविभक्तिः **(२) कारकविभक्तिः** (३) प्रथमाविभक्तिः (४) कोऽपि नास्ति

(१४३) उपपदविभक्तेः कारकविभक्तिः बलीयसी- इत्यस्य उदाहरणं भवति-

(१) रामं नमामि **(२) नमस्करोति देवान्** (३) यागाय याति (४) कोऽपि नास्ति

(१४२) प्रातिपदिकसंज्ञाविधायकम् सूत्रम् अस्ति-

(१) गतिश्च (२) घि **(३) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (४) नदी

(१४३) स्वतन्त्रः............|

(१) कर्मम् **(२) कर्ता** (३) अधिकरणम् (४) करणम्

(१४४) प्रातिपदिकार्थे का विभक्तिः?

(१) द्वितीया (२) तृतीया **(३) प्रथमा** (४) षष्ठी

(१४५)" 'श्रीः' इत्यत्र कस्मिन्नर्थे प्रथमा?

**(१) प्रातिपदिकार्थमात्रे** (२) परिमाणमात्रे (३) लिङ्गमात्रे (४) वचनमात्रे

(१४६) 'द्रोणो व्रीहिः' इत्यत्र कस्मिन्नर्थे प्रथमा?

(१) प्रातिपदिकार्थमात्रे **(२) परिमाणमात्रे** (३) लिङ्गमात्रे (४) वचनमात्रे

(१४७) 'बहवः' इत्यत्र कस्मिन्नर्थे प्रथमा?

(१) प्रातिपदिकार्थमात्रे (२) परिमाणमात्रे (३) लिङ्गमात्रे **(४) संख्यामात्रे**

(१४८) द्वितीया विभक्तेः कारकं किम् ?

**(१) कर्मम्** (२) अपादानम् (३) अधिकरणम् (४) करणम्

(१४९) तृतीया विभक्तेः कारकं किम् ?

(१) कर्मम् (२) अपादानम् (३) अधिकरणम् **(४) करणम्**

(१५०) चतुर्थी विभक्तेः कारकं किम् ?

(१) कर्मम् (२) अपादानम् **(३) सम्प्रदानम्** (४) करणम्

(१५१) पञ्चमी विभक्तेः कारकं किम् ?

(१) कर्मम् **(२) अपादानम्** (३) अधिकरणम् (४) करणम्

(१५३) सप्तमी विभक्तेः कारकं किम् ?

(१) कर्मम्   (२) अपादानम्   **(३) अधिकरणम्**   (४) करणम्

(१५४) सम्बोधने विभक्तिः भवति -

(१) द्वितीया   (२) तृतीया   **(३) प्रथमा**   (४) षष्ठी

(१५५) 'कर्मकारक'' विधायकम् सूत्रम् अस्ति-

(१) साधकतमम्   **(२) कर्तुरीप्सिततमम्**   (३) कर्तृकरणयोः   (४) कर्मणि द्वितीया

(१५६) कर्तुः क्रियया ईप्सिततमं कारकम्-

**(१) कर्म**   (२) करण   (३) संप्रदानम्   (५) कर्ता

(१५७) अपादानादिविशेषैः अविवक्षितं कारकं.............

**(१) कर्म**   (२) करण   (३) संप्रदानम्   (५) कर्ता

(१५८) अनीप्सितस्य का संज्ञा?

**(१) कर्मसंज्ञा**   (२) करणसंज्ञा  (३) संप्रदानम्संज्ञा  (५) कर्तासंज्ञा

(१५९) 'क्रुधद्रुहोरुपसृष्टयोः संज्ञा भवति?

**(१) कर्मसंज्ञा**   (२) करणसंज्ञा  (३) संप्रदानम्संज्ञा  (५) कर्तासंज्ञा

(१६०) कर्मणि.........|

(१) पञ्चमी   (२) षष्ठी   **(३) द्वितीया**   (४) चतुर्थी

(१६१) 'अभितः' इति शब्दस्य योगे का विभक्तिः?

(१) पञ्चमी (२) षष्ठी **(३) द्वितीया** (४) चतुर्थी

(१६२) 'परितः' इति शब्दस्य योगे का विभक्तिः?

(१) पञ्चमी (२) षष्ठी **(३) द्वितीया** (४) चतुर्थी

(१६३) 'निकषा' इति शब्दस्य योगे का विभक्तिः?

(१) पञ्चमी (२) षष्ठी **(३) द्वितीया** (४) चतुर्थी

(१६४) 'समया' इति शब्दस्य योगे का विभक्तिः?

(१) पञ्चमी (२) षष्ठी **(३) द्वितीया** (४) चतुर्थी

(१६१) 'विना' इति शब्दस्य योगे का विभक्तिः?

(१) प्रथमा (२) षष्ठी **(३) तृतीया** (४) चतुर्थी

(१६२) अन्तराऽन्तरेण युक्ते" इत्यनेन का विभक्तिः ?

(१) पञ्चमी (२) षष्ठी **(३) द्वितीया** (४) चतुर्थी

(१६३) अधिशीङ्स्थासां कर्म इति सूत्रेण का संज्ञा भवति?

**(१) कर्म** (२) करण (३) संप्रदानम् (५) कर्ता

(१६४) …………स्पृहयति |

(१) पुष्पम्   **(२) पुष्पेभ्यः**   (३) पुष्पे   (४) पुष्पस्य

(१६५) ............गच्छति |

(१) ग्रामस्य   **(२) ग्रामं**   (३) ग्रामे   (४) ग्रामाय

(१६६) माणवकं.........ब्रूते |

(१) धर्मात्   (२) धर्मस्य   **(३) धर्मं**   (४) धर्मे

(१६७) ...........कृष्णम् |

**(१) अभितः**   (२) अनु   (३) उप   (४) परितः

(१६८) अधिवसति.............हरिः |

**(१) वैकुण्ठं**   (२) वैकुण्ठे  (३) वैकुण्ठस्य   (४) वैकुण्ठाय

(१६९) 'करणकारक'' विधायकम् सूत्रम् अस्ति-

**(१) साधकतमम्**   (२) कर्तुरीप्सिततमम्   (३) कर्तृकरणयोः   (४) कर्मणि द्वितीया

(१७०) क्रियासिद्धौ प्रकृष्टोपकारकं ...................संज्ञं स्यात् |

(१) कर्म   **(२) करण**   (३) संप्रदानम्   (५) कर्ता

(१७१) 'नाना' इति शब्दस्य योगे का विभक्तिः?

(१) पञ्चमी   **(२) तृतीया**   (३) द्वितीया   (४) चतुर्थी

(१७२) 'सह' इति शब्दस्य योगे का विभक्तिः?

(१) पञ्चमी **(२) तृतीया** (३) द्वितीया (४) चतुर्थी

(१७३) 'साकम्' इति शब्दस्य योगे का विभक्तिः?

(१) पञ्चमी **(२) तृतीया** (३) द्वितीया (४) चतुर्थी

(१७४) 'सार्धम्' इति शब्दस्य योगे का विभक्तिः?

(१) पञ्चमी **(२) तृतीया** (३) द्वितीया (४) चतुर्थी

(१७५) हेत्वर्थे का विभक्तिः ?

(१) पञ्चमी **(२) तृतीया** (३) द्वितीया (४) चतुर्थी

(१७६) ...........खञ्जः |

**(१) पादेन** (२) पादस्य (३) पादम् (४) पादानि

(१७७) रामः रावणं ............हन्ति |

**(१) बाणेन** (२) बाणात् (३) बाणस्य (४) बाणे

(१७८) गुरुणा..........आगतः शिष्यः |

(१) विना (२) अन्तरेण **(३) सह** (४) नमः

(१७९) ...........विना नास्ति सुखानुभुतिः |

**(१) दुःखेन** (२) दुःखाय (३) दुःखस्य (४) दुःखे

(१८०) कर्मणा यमभिप्रैति स................|

(१) कर्म (२) करण **(३) सम्प्रदानम्** (५) कर्ता

(१८१) 'स्वस्ति' इति पदस्य योगे-

(१) पञ्चमी (२) षष्ठी (३) द्वितीया **(४) चतुर्थी**

(१८२) 'नमः' इति पदस्य योगे-

(१) पञ्चमी (२) षष्ठी (३) द्वितीया **(४) चतुर्थी**

(१८३) 'अलम्' इति पदस्य योगे-

(१) पञ्चमी (२) षष्ठी (३) द्वितीया **(४) चतुर्थी**

(१८४) 'स्वाहा' इति पदस्य योगे-

(१) पञ्चमी (२) षष्ठी (३) द्वितीया **(४) चतुर्थी**

(१८५) 'वषट्' इति पदस्य योगे-

(१) पञ्चमी (२) षष्ठी (३) द्वितीया **(४) चतुर्थी**

(१८६) .................मोदकाः रोचन्ते |

**(१) बालकाय** (२) बालके (३) बालकस्य (४) बालकात्

(१८७) '<u>बालकेभ्यः</u> मिष्ठान्नं रोचते''' रेखाङ्कित पदे का विभक्तिः अस्ति ?

(१) प्रथमा (२) षष्ठी (३) द्वितीया **(४) चतुर्थी**

(`१८८) ............स्वस्ति|

(१) प्रजा (२) प्रजायां **(३) प्रजाभ्यः** (४) प्रजाषु

(१८९) राजा ..................गां ददाति |

(१) ब्राह्मणे (२) ब्राह्मणाः **(३) ब्राह्मणाय** (४) ब्राह्मणस्य

(१९०) अपादाने............|

**(१) पञ्चमी** (२) षष्ठी (३) द्वितीया (४) चतुर्थी

(१९१) अपाये अर्थे संज्ञा भवति-

**(१) पञ्चमी** (२) षष्ठी (३) द्वितीया (४) चतुर्थी

(१९२) "भीत्रार्थानां भयहेतुः" इति सूत्रेण का विभक्तिः ?

**(१) पञ्चमी** (२) षष्ठी (३) द्वितीया (४) चतुर्थी

(१९३) ध्रुवमपाये.............'इत्यत्र किं कारकम् ?

(१) कर्म (२) करण (३) संप्रदानम् **(४) अपादानम्**

(१९४) .................बिभेति |

(१) चोरस्य **(२) चोरात्** (३) चोरः (४) चोराय

(१९५) ................. गङ्गा प्रभवति |

(१) हिमवति (२) हिमवतं (३) हिमवान् **(४) हिमवतः**

(१९६) 'ऋते' इति शब्दस्य योगे का विभक्तिः?

**(१) पञ्चमी** (२) षष्ठी (३) द्वितीया (४) चतुर्थी

(१९७) 'आरात्' इति शब्दस्य योगे का विभक्तिः?

(१) प्रथमा **(२) पञ्चमी** (३) द्वितीया (४) चतुर्थी

(१९८)...............पत्रं पतति |

(१) वृक्षस्य (२) वृक्षाय **(३) वृक्षात्** (४) वृक्षम्

(१९९) ............ स्मरति |

(१) माते **(२) मातुः** (३) माता (४) मातरैः

(२००).............वस्त्रं ददाति |

(१) रजकाय (२) राजकात् (३) रजकं **(४) रजकस्य**

(२०१) अर्जुनस्य वचनद्वयम् |- रेखाङ्कित पदे का विभक्तिः अस्ति ?

(१) प्रथमा **(२) षष्ठी** (३) द्वितीया (४) चतुर्थी

(२०२) आधारो..........|

**(१) अधिकरणम्** (२) करण (३) संप्रदानम् (५) कर्ता

(२०३) ............ कालिदासः श्रेष्ठः|

(१) कविभ्यः **(२) कविषु** (३) कवयः (४) कविभिः

(२०४) सम्बोधने विभक्तिः भवति-

**(१) प्रथमा** (२) षष्ठी (३) द्वितीया (४) चतुर्थी

(२०५) "ग्रामं परितः क्षेत्राणि सन्ति"- इति रेखाङ्किते पदे का विभक्ति अस्ति ?

(१) पञ्चमी (२) षष्ठी **(३) द्वितीया** (४) चतुर्थी

(२०६) "अक्ष्णा काणः" इति रेखाङ्किते पदे का विभक्ति अस्ति ?

**(१) तृतीया** (२) षष्ठी (३) द्वितीया (४) चतुर्थी

(२०७) वैद्यः ..................चिकित्सति |

(१) रुग्ण **(२) रोगिणं** (३) रुग्णेन (४) रुग्णस्य

(२०८) आयुर्वेदः वदति-'..........रक्षार्थं ब्राह्मे मुहूर्ते उत्तिष्ठेत् ?

**(१) आयुषः** (२) आयुषि (३) आयुः (४) आयुषी

(२०९) रोगी......स्वास्थ्यं लभते?

**(१) औषधेन** (२) औषधात् (३) औषधस्य (४) औषधे

(२१०) पादेन खञ्जः इत्यत्र तृतीया विधायकं सूत्रं किम् ?

(१) इत्थम्भूतलक्षणे **(२) येनाङ्गविकारः** (३) सहयुक्तेऽप्रधाने (४) हेतौ

(२११) ...........पुष्पं रोचते|

(१) प्रिया (२) प्रियया (३) **प्रियायै** **(४)** प्रियायाः

(२१२) पाण्डवाः ..........क्रुध्यन्ति|

(१) कौरवाः **(२) कौरवेभ्यः** (३) कौरवान् (४) कौरवाणाम्

(२१३) वैद्यः...........औषधं ददाति|

(१) रुग्ण **(२) रुग्णाय** (३) रुग्णेन (४) रुग्णस्य

(२१४) ................. परमादरः विधेयः |

**(१) आयुर्वेदोपदेशेषु** (२) आयुर्वेदोपदेशस्य

(३) आयुर्वेदोपदेशः (४) आयुर्वेदोपदेशात्

(२१५) आयुषः रक्षार्थे..............मुहूर्ते उतिष्ठेत् |

**(१) ब्राह्मे** (२) ब्राह्मं (३) ब्रह्मात् (४) ब्राह्मस्य

(२१६) ...............पथ्यकथनं रोचते |

**(१) वैद्याय** (२) वैद्यात् (३) वैद्यस्य (४) वैद्यं

## TOPIC NO.10 (प्रत्ययाः)

(२१७) कृदन्तस्य का संज्ञा भवति ?

(१) प्रत्ययः (२) धातुः (३) संयोगः **(४) प्रातिपदिकः**

(२१८) मोहनः जलं .................. इच्छति |

(१) पठित्वा (२) पानेम् **(३) पातुम्** (४) पिबति

(२१९) सः ........ गृहं गमिष्यति |

(१) पाठयित्वा **(२) पठित्वा** (३) पठितुम् (४) पठति

(२२०) सीता पुस्तकानि ............. पठति |

(१) आगत्य **(२) आदाय** (३) आनीत्वा (४) भूत्वा

(२२१) .................. बालिका गृहं गच्छति |

(१) कम्पमानः (२) कम्पमानम् **(३) कम्पमाना** (४) कम्पमानैः

(२२२) ‘क्तवत् प्रत्ययस्य’ उदाहरणं अस्ति

**(१) भूतवान्** (२) याचनीयः (३) समर्च्य (४) पठित्वा

(२२३) ‘तव्यत् प्रत्ययस्य’ उदाहरणं अस्ति

(१) भूतवान्  (२) याचनीयः  (३) समर्च्य  **(४) अटितव्यः**

(२२४) 'शतृ प्रत्ययस्य' उदाहरणं अस्ति

**(१) खादन्**  (२) याचनीयः  (३) समर्च्य  (४) पठित्वा

(२२५) 'शानच् प्रत्ययस्य' उदाहरणं अस्ति

(१) भूतवान्  **(२) सेवमानः**  (३) समर्च्य  (४) पठित्वा

(२२६) 'क्त प्रत्ययस्य' उदाहरणं अस्ति

(१) भूतवान्  (२) सेवमानः  **(३) पठितः**  (४) पठित्वा

(२२७) 'तुमुन् प्रत्ययस्य' उदाहरणं अस्ति

(१) भूतवान्  **(२) अर्चितुम्**  (३) समर्च्य  (४) पठित्वा

(२२८) 'क्त्वा प्रत्ययस्य' उदाहरणं अस्ति

(१) भूतवान्  (२) सेवमानः  (३) समर्च्य  **(४) पठित्वा**

(२२९) अस् +क्त्वा=...........|

(१) भूतः  (२) भूते  **(३) भूत्वा**  (४) असत्वा

(२३०) दा +क्त्वा=...........|

(१) दातः  (२) दाते  **(३) दत्त्वा**  (४) दात्वा

(२३१) पी +क्त्वा=...........|

(१) पीतः (२) पीते (३) पात्वा **(४) पीत्वा**

(२३२) स्मृ+क्त्वा=...........|

(१) स्मृतः (२) स्मृते **(३) स्मृत्वा** (४) सत्वा

(२३३) हस् +क्त्वा=...........|

**(१) हसित्वा** (२) हसिते (३) हसत्वा (४) हसितः

(२३४) प्र +दा +ल्यप् =..........|

**(१) प्रदाय** (२) प्रदतः (३) प्रदत्वा (४) प्रदे

(२३५) यज् +तुमुन् =..........|

**(१) यष्टुम्** (२) यजतः (३) यजत्वा (४) यजे

(२३६) पा + तुमुन् =..........|

**(१) पातुम्** (२) पातः (३) पीत्वा (४) पाने

(२३७) शतृ-शानच् =..........|

**(१) वर्तमान कृदन्त** (२) हेत्वर्थक कृदन्त (३) भूतकृदन्त (४) भविष्य कृदन्त

(२३८) 'चलन्' पदे कः प्रत्ययः ?

**(१) शतृ**  (२) क्तः  (३) क्त्वा  (४) तुमुन्

(२३९) 'सेवमानः' पदे कः प्रत्ययः ?

(१) शतृ  **(२) शानच्**  (३) क्त्वा  (४) तुमुन्

(२४०) 'क्रीतवान्' पदे कः प्रत्ययः ?

**(१) क्तवतु**  (२) क्तः  (३) क्त्वा  (४) तुमुन्

(२४१) 'पठनीया' पदे कः प्रत्ययः ?

(१) शतृ  (२) क्तः  **(३) अनीयर्**  (४) तुमुन्

(२४२) 'भवनम्' पदे कः प्रत्ययः ?

**(१) ल्युट्**  (२) क्तः  (३) क्त्वा  (४) तुमुन्

(२३८) 'पाचकः' पदे कः प्रत्ययः ?

(१) शतृ  (२) क्तः  (३) क्त्वा  **(४) ण्वुल्**

## TOPIC NO.11 (विशेषण विशेष्य)

(२३९) विशेषणविशेष्ययोः लिङ्गवचनविभक्तयः................ भवन्ति |

**(१) समानाः**  (२) भिन्नाः  (३) कदाचित् समानाः  (४) कदाचित् भिन्नाः

(२४०) .................अन्नं न खादितव्यम् |

(१) पर्युषिता (२) पर्युषितः **(३) पर्युषितम्** (४) पर्युषितानि

(२४१) यथा आहारः तथा एव स्वास्थ्यस्य........|

(१) लाभाः (२) लाभौ (३) **लाभः** **(४)** लाभस्य

(२४२) .................. रुग्णानां सेवा ईश्वरसेवा खलु |

(१) पीडितेषु **(२) पीडितानां** (३) पीडितस्य (४) पीडितेयोः

(२४३) ................ नास्ति निष्फला |

(१) चिकित्सकः (२) चिकित्सकं **(३) चिकित्सा** (४) चिकित्सकेन

(२४४) यः आयुर्वेदे विश्वसिति सः ..............आहारं निन्दति |

**(१) विपरीतम्** (२) विपरीतस्य (३) विपरीते (४) विपरीतः

(२४५) आयुर्वेदे पथ्यम् ...........|

(१) अत्यावश्यकी **(२) अत्यावश्यकं** (३) अत्यावश्येः (४) अत्यावश्यकाः

(२४६) प्रसन्नमुखं स्वास्थ्यस्य ..........लक्षणम् |

(१) उत्तमः **(२) उत्तमम्** (३) उत्तमा (४०) उत्तम

(२४७) विषमः अग्निः अत्र विशेषणं किम् ?

(१) विषमः अग्निः **(२) विषमः** (३) अग्निः (४) कोऽपि नास्ति

(२४८) विषमः अग्निः अत्र विशेष्य किम् ?

(१) विषमः अग्निः (२) विषमः **(३) अग्निः** (४) कोऽपि नास्ति

(२४९) लघूनि द्रव्याणि अत्र विशेषणं किम् ?

(१) लघूनि द्रव्याणि (२) द्रव्याणि **(३) लघूनि** (४) कोऽपि नास्ति

(२५०) लघूनि द्रव्याणि अत्र विशेष्य किम् ?

(१) लघूनि द्रव्याणि **(२) द्रव्याणि** (३) लघूनि (४) कोऽपि नास्ति

(२५१) आयुषः वेदः आयुर्वेदः ज्ञातव्यः इति.........जनाः मन्यन्ते |

**(१) कुशाग्राः** (२) कुशाग्रा (३) कुशाग्रं (४) कुशाग्रेषु

## Q 2 Short answer Questions (SAQ)

### ( 8 questions 5 marks for each que.All compulsory)

### Topic-6 ( सन्धिः)

**Q-१ अधोदत्तानां पदानां सन्धिं छित्वा वा योजयित्वा लिखत |** **(5Que x 1 marks each ) (05)**

(१) नाडी+अधिकम् (२) पाण्डु+आतुर (३) सुधी+उपास्य

(४) धातृ+अंशः

(५) दधि+ओदनः

(६) प्रति+एकम्

(७) अग्नि+आशयः

(८) इति+अपि

(९) अति+उत्तमः

(१०) दधि+अत्र

(११) खलु+अत्र

(१२) लृ+आकारः

(१३) धातृ+आदेशः

(१४) मधु+आनय

(१५) शिशु+अङ्गम्

(१६) अभि+अङ्गम्

(१७) ज्ञान+इन्द्रियम्

(१८) उपेन्द्रः

(१९) रसन+इन्द्रियम्

(२०) उष्णोदकम्

(२१) शब्देन्द्रियम्

(२२) नागोदरम्

(२३) गुणोपेतम्

(२४) तथा+इति

(२५) अजिर्णौषधम्

(२६) स्वच्छोदकम्

(२७) गिष्मर्तुः

(२८) दोषौषधमलानाम्

(२९) शर्करा+ओदनः

(३०) वन+ओकः

(३१) तण्डुल+ओदनः

(३२) महौषधिः

(३३) जलौधः

(३४) दिव्यौषधम्

(३५) विनायकः

(३६) नायकः

(३७) उभौ+अपि

(३८) पावनः

(३९) हरे+ए

(४०) गो+य

(४१) नौ+य

(४२) प्रेजते

(४३) उपौषति

(४४) विष्णो+अव

(४५) मुने+अत्र

(४६) सेवते+अशोकः

(४७) प्रभो+अत्र

(४८) चिकित्सालयः

(४९) गर्भ+आशयः

(५०) मलाशयः

(५१) भूतात्मा

(५२) रामस्+शेते

(५३) रामस्+चिनोति

(५४) सत्+चित्

(५५) उज्जवलः

(५६) तत्+टिका

(५७) दुष्टः

(५८) रामष्षष्ठः

(५९) वाक्+ईशः

(६०) दिग्+अम्बरः

(६१) जगदीशः

(६२) पीडयेत्+इन्द्रियाणि

(६३) षट्+ऋतवः

(६४) पचेत+वायुनेरितः

(६५) सुब्+अन्तः

(६६) कृत्+अन्तः

(६७) एतद्+मुरारि

(६८) जगत्+नाथः

(६९) षट्+मासाः

(७०) हृत्+नाभ्योः

(७१) तत्+मात्रम्

(७२) विद्वान्+लिखति

(७३) तत्+लयः

(७४) उद्+लेखः

(७५) सद्+कारः

(७६) दिग्+पालः

(७७) हरिम्+वन्दे

(७८) त्वम्+करोषि

(७९) जलम्+वहति

(८०) मनान्+सि

(८१) शिव+छाया

(८२) लक्ष्मी+ छाया

(८३)शिवो+वन्द्यः

(८४) मनस्+रथः

(८५) अहन्+अहः

(८६) विष्णुः+त्राता

(८७) हित + अहितम

(८८) कुष्ठी + इक्षुमेही

(८९) मधुमेही + ईदश

(९०) भू + उत्क्षेप

(९१) बल + इन्द्रियम

(९२) आयुः + वेद

(९३) प्रातः + भुक्त्वा

(९४) रोगः + अवर्धत

(९५) वागिन्द्रियम

(९६) तच्चतुर्गुणम्

(९७) यदन्नम्

(९८) अं + बुः

(९९) पश्येदपि

(१००) रात्रौ + अपि

(१०१) दव्युवाच

(१०२) दु: + शासन

(१०३) अंतः + करण

(१०४) तद् + शरीरम्

(१०५) नाडी+अधिकम्

(१०६) पाण्डु+ आतुर

(१०७) व्याधि+आतुरः

(१०८) मृद्र् + अग्निः

## Topic No.7 – **समासः**

**Q-२ अधोदत्तानां पदानां विग्रहवाक्यं समस्तपदं लिखत |** **(5 Que x 1 marks each ) (05)**

**१.अव्ययिभावसमासः**

(१) अध्यात्मम्

(२) अधिगोपम्

(३)औषधौ इति

(४)गिरौ इति

(५)कृष्णस्य समीपम्

(६)उपवृक्षम्

(७)गङ्गायाः समीपम्

(८)मद्राणां समृद्धिः

(९)मगधानां समृद्धिः

(१०)सुभिक्षम्

(११)सुभारतम्

(१२)यवनानां व्युद्धिः

(१३)दुर्भिक्षम्

(१४)निर्मक्षिकम्

(१५)विघ्नानाम् अभावः

(१६)निष्प्राणम्

(१७)निर्मशकम्

(१८)जनानाम् अभावः

(१९)दोषाणाम् अभावः

(२०)निर्ज्वरम्

(२१)मलानाम् अभावः

(२२)अतिरोगम्

(२३)स्वप्नः सम्प्रति न युज्यते

(२४)अतिकम्बलम्

(२५)अतिनिद्रम्

(२६)पाणिनिशब्दस्य प्रकाशः

(२७)इतिज्ञानम्

(२८)इत्यायुर्वेदम्

(२९)अनुविष्णु

(३०)शिष्यस्य पश्चात्

(३१)अनुरूपम्

(३२)गुणस्य योग्यम्

(३३)अनुलेखनम्

(३४)अनुविद्यालयम्

(३५)प्रत्येकम्

(३६)गृहं गृहं प्रति

(३७)प्रतिदिनम्

(३८)प्रत्यर्थम्

(३९)यथाशक्ति

(४०)बलम् अनतिक्रम्य

(४१)यथाबुद्धि

(४२)ज्ञानम् अनतिक्रम्य

(४३)सरूपम्

(४४)अनुवर्णम्

(४५)वृद्धस्य आनुपूर्व्येण

(४६)अनुज्येष्ठम्

(४७)सहर्षम्

(४८)शस्त्रेण युगपत्

(४९)सवर्णम्

(५०)क्षत्राणां सम्पत्तिः

(५१)सतृणम्

(५२)अग्निग्रन्थपर्यन्तम् अधीते इति

(५३)सबालकाण्डम्

(५४)अधिहरि

**२.तत्पुरुषसमासः**

(५५)कृष्णश्रितः

(५६)लोकम् अतीतः

(५७)दुःखम् अतीतः

(५८)कूपपतितः

(५९)स्वर्गगतः

(६०)शरणागतः

(६१)जीवनप्राप्तः

(६२)सुखम् आपन्नः

(६३)दुःखापन्नः

(६४)शङ्कुलया खण्डः

(६५)धान्यार्थः

(६६)दानार्थ

(६७)हरिणा त्रातः

(६८)नखभिन्नः

(६९)धर्मेण रक्षितः

(७०)बाणविद्धः

(७१)यूपाय दारु

(७२)कुम्भमृत्तिका

(७३)भूतेभ्यः/भूताय बलिः

(७४)गोतम्

(७५)गोभ्यः सुखम्

(७६)चोरभयम्

(७७)व्याध्रात् भयम्

(७८)सिंहभीतिः

(७९)वृकात् भीतिः

(८०)सर्पभीः

(८१)राक्षः भयम्

(८२)नराणां पतिः

(८३)विद्यायाः आलयः

(८४)राजकुमारः

(८५)राक्षः पुत्रः

(८६)दशरथस्य पुत्रः

(८७)प्रजायाः पतिः

(८८)सितायाः पतिः

(८९)गङ्गायाः जलम्

(९०)हिमालयः

(९१)पशूनां पतिः

(९२)देवभाषा

(९३)अक्षेषु शौण्डः

(९४)कार्यकुशलः

(९५)मुनिषु श्रेष्ठः

(९६)पुरुषोत्तमः

(९७)नरेषु उत्तमः

(९८)विद्यायाः प्रविणः

(९९)महान् चासौ देवः

(१००)महाराजः

(१०१)महान् चासौ आत्मा

(१०२)महापुरुषः

(१०३)महर्षिः

(१०४)महान् कविः

(१०६)अकृतम्

(१०७)न इच्छा

(१०८)अधर्मः

(१०९)अहिंसा

(११०)न उचित

(१११)धर्मं जानाति इति

(११२)धनदः

(११३)दिनकरः

(११४)कृष्णसर्पः

(११५)मधुरफ़लम्

(११६)श्रेष्ठः पुरुषः

(११७)शोकाग्निः

(११८)शीतोष्णम्

(११९)पञ्चानां गवां समाहारः

(१२०)पञ्चामृतम्

(१२१)त्रिफ़ला

**३ बहुव्रीहि समास**

(१२२)जितानि इन्द्रियाणि येन सः

(१२२)पीताम्बरः

(१२३)शीतिकण्ठः

(१२४)चक्रपाणिः

(१२५)केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम्

(१२६)सपुत्रः

(१२७)प्राप्तोदकः

(१२८)वीराः पुरुषाः यस्मिन् सः

## ४. द्वन्द्व समास

(१२९)रामलक्ष्मणौ

(१३०)पाणिपादम्

(१३१)णिविनायकौ

(१३२)बालश्च वृद्धश्च

(१३३)युवानौ

(१३४)अहोरात्रम्

(१३५)हरिहरौ

(१३६)अर्थधर्मौ

(१३७)वाक्त्वचम्

(१३८)धवखदिरौ

(१३९)ईशकष्णौ

(१४०)धर्मार्थसुखानि

(१४१)सङ्क्षेपविस्तरौ

(१४२)हृन्नाभि

(१४३)शुक्रार्तवे

## Topic-4 (अव्ययानि)

**Q-३ अधोदत्तैः अव्ययपदैः रिक्तस्थानम् पूरयत ||** **(5 Que x 1 marks each ) (05)**

( अत्र, च, हि, अपि, सदा )

(१) रामः……. लक्ष्मणः वनं गच्छति |

(२) अहं……..अर्घ्यं यच्छामि |

(३) एतत् सत्यं……..|

(४) जातस्य……….धृवो मृत्यु |

(५) त्वं……नहि दृश्यते |

(ननु, किल, पुनः ,वा, एव)

(६) परीक्षा कदा इति स्मरति……….|

(७)………शब्दार्थो काव्यम् |

(८) बालो ……वृद्धः|

(९) भवान्………किम् |

(१०) ………मिलामः |

( उच्चैः,विना, एवं, सह,ऋते)

(११) छात्राः पुस्तकं........न शोभन्ते |

(१२) गायकः..........गायति |

(१३) संस्कृतात्........ आयुर्वेदस्य मूलार्थः न ज्ञायते |

(१४) अहम्..........न चिन्तयामि |

(१५) पुत्रेण........आगतः पिता |

(यथा-तथा, सार्धं,इति, यदा-तदा, यावत्-तावत्)

(१६) सीता रामेण......... विहरति |

(१७) .........राजा.......प्रजा |

(१८) ........मित्रम् आगच्छति.......अहं क्रिडामि |

(१९) ........... द्वितीयोऽध्यायः |

(२०) ..........अधर्म: भवति.........ईश्वरः अवतरति |

(साकम्, न, कति, यदि-तर्हि,कुत्र)

(२१) .........पठिष्यसि.......उत्तिर्णः भविष्यसि |

(२२) कृष्णः मया.......आगतवान् |

(२३) रमेशः विद्यालयं.......गच्छति |

(२४) त्वं........गच्छसि |

(२५) ........छात्राः ?

(किमर्थम्, अन्यथा, एकत्र, कुतः, सदा)

(२६) भवान्....... आगच्छति ?

(२७) ........विलम्बः ?

(२८)......... बहु कष्टम् भविष्यति |

(२९) ..........सुखी भव |

(30) ते सर्वे ........वसति |

(अपि , च, हि , इदं ,किल )

(३१) राम: श्यामः......... |

(३२) पुस्तकं ............. आनय |

(३३) इदं मया कर्तव्यं ............ |

(३४) सवै: ............ स्वधर्म: आचरणीय: |

(३५) ............. तु करणीयम् एव |

( किल, वा , एव , उच्चैः , पुनः)

(३६) राज्ञ:  प्रजा पालनीय ........... |

(३७) पार्थ ......... धनुर्धर : |

(३८) इदं एतद् ....... करणीयम् |

(३९) ........ उच्चै: हरि : |

(४०)  ......... पुन: पठनीयम् |

(एव ,किल , उच्चैः , ऋते , विना )

(४१) कवीनां कालिदास: श्रेष्ठ: ........... |

(४२) शंखः पाण्डुर ....... |

(४३) ........ ज्ञानान् न मुक्ति: |

(४४) ............ पठनीयम् |

(४५) ज्ञानेन विना मनुष्य: न शोभते |

( उच्चैः , वा, एवम् ,एव , सह )

(४६)  राम: श्याम: ............पाठनीय: |

(४७) युध्धै शंखं .............. अवादयत् भीष्म: |

(४८) राम: पठति ............ |

(४९) .............इदं कर्तव्यम् |

(५०) पिता ................ पुत्र: आगच्छति |

(यथा-तथा , युगपत् , इति , सार्धम् , यदा-तदा )

(५१) रामेण .......... लक्ष्मण: गच्छति |

(५२) राम: श्यामश्च ............. समागतौ |

(५३) ........... राम: .............श्याम: |

(५४) मम नाम लोकनाथ: ............. |

(५५) .............. गुरु: आगच्छति ........... छत्रा: उतिष्ठन्ति |

( साकम् , न ,इति , यदि –तर्हि ,कुत्र )

(५६) ............. चतुर्थोऽध्याय: |

(५७) ......... त्वं मन्दिरं गमिष्यति .............अहम् अपि गमिष्यामि |

(५८) त्वया ........... अहं गमिष्यामि |

(५९) इदं ...............करणीयम् |

(६०) तव विधालय: ............. वर्तते ?

(कुतः , कियत् , इह , कति ,किमर्थं )

(६१) आपणकाय .................. रुप्यकाणि दातव्यानि |

(६२) भवान् ................. आगच्छति |

(६३) गोपाल: ............. रोदिति ?

(६४) ................... धनं भवताम् ?

(६५) ............... भवान् उपविशतु |

( तत्र , अत्र , सर्वत्र , कुत्र , अन्यत्र )

(६६) ............ उपविश, तावदागच्छामि |

(६७) कदापि ............ मा गच्छ |

(६८) ईश्वरस्य सत्ता ............ अस्ति |

(६९) स: ............ निवसति |

(७०) भवान् ................. गच्छति ?

(सर्वदा , अन्यथा , एकत्र , एकदा ,अपि )

(७१) रमेशः........... गच्छति |

(७२) युध्धसमये ............ न स्थातव्यम् |

(७३) ............. सत्यं वक्तव्यम् |

(७४) इदं त्वया करणीयम् ............... दण्डित: भविष्यसि |

(७५) ............. तत्राहं गतवान् |

(७६) ........ ज्ञानं न सुखे | (नाना, विना, सह )

(७७) जलं ....... वहति। (नीचे, उच्चै, परा)

(७८) शिशु ......... चलति। ( शनै शनै, सार्धम, साक् )

(७९) इश्वर: ............ व्याप्तः। ( सर्वत्र, सरसा, विना)

(८०) दर्वाहम .......... जीवीत जातं। (अत्र, तत्र, सरसा )

(८१) सूक्ष्म ...........अनील। (च, अपि, खलु)

(८२) अहं ............ गच्छामि। ( अपि, विना, सह )

(८३) रमन्ते देवता। (तत्र, सह, यथा)

(८४) रामेण ..... सीता न शोभति। (सह, विना, अपि)

(८५) ......... कुत्र गच्छसि ? (कुत्र, अत्र, अधुना )

(८६) भूमिस्तथा तोयं। (यथा, यदा, विना )

(८७) शरीरमाद्यं .......... धर्मसाधनं। (खलु, पुनः, कति)

(८८) गोरसं को रसो भोजनानां। (विन, सदा, एवं )

## **Topic-8 (शब्दरुपाणि)**

**Q-४ शब्दरुपाणि लिखत ||** **(5 Que x 1 marks each ) (05)**

(१) ‘वैद्य’ शब्दस्य पञ्चमीविभक्ति एकवचनं लिखत |

(२) ‘अग्नि’ शब्दस्य पञ्चमीविभक्ति एकवचनं लिखत |

(३) ‘ऋतु’ शब्दस्य द्वितीयाविभक्ति बहुवचनं लिखत |

(४) ‘धातृ’ शब्दस्य द्वितीयाविभक्ति एकवचनं लिखत |

(५) ‘गो’ शब्दस्य द्वितीयाविभक्ति एकवचनं लिखत |

(६) ‘रोगिन्’ शब्दस्य चतुर्थीविभक्ति एकवचनं लिखत |

(७) ‘मरुत्’ शब्दस्य षष्ठीविभक्ति बहुवचनं लिखत |

(८) ‘भिषज्’ शब्दस्य तृतीयाविभक्ति एकवचनं लिखत |

(९) ‘कला’ शब्दस्य द्वितीयाविभक्ति एकवचनं लिखत |

(१०) ‘धमनी’ शब्दस्य द्वितीयाविभक्ति एकवचनं लिखत |

(११) ‘प्रकृति’ शब्दस्य सप्तमीविभक्ति बहुवचनं लिखत |

(१२) ‘धेनु’ शब्दस्य सप्तमीविभक्ति एकवचनं लिखत |

(१३) ‘वर्षाभू’ शब्दस्य प्रथमाविभक्ति द्विवचनं लिखत |

(१४) ‘मातृ’ शब्दस्य तृतीयाविभक्ति बहुवचनं लिखत |

(१५) ‘वाच्’ शब्दस्य द्वितीयाविभक्ति बहुवचनं लिखत |

(१६) ‘स्रज्’ शब्दस्य षष्ठीविभक्ति बहुवचनं लिखत |

(१७) ‘प्रावृष्’ शब्दस्य सप्तमीविभक्ति बहुवचनं लिखत |

(१८) ‘पित्त’’ शब्दस्य द्वितीयाविभक्ति बहुवचनं लिखत |

(१९) ‘मधु’ शब्दस्य सप्तमीविभक्ति एकवचनं लिखत |

(२०) ‘दधि’ शब्दस्य चतुर्थीविभक्ति एकवचनं लिखत |

(२१) ’मनस्’ शब्दस्य सप्तमीविभक्ति एकवचनं लिखत |

(२२) ‘आयुष्’ शब्दस्य प्रथमाविभक्ति बहुवचनं लिखत |

(२३) ‘तद्’ शब्दस्य सप्तमीविभक्ति बहुवचनं लिखत |

(२४) ‘इदम्’ शब्दस्य तृतीयाविभक्ति द्विवचनं लिखत |

(२५) ‘रुग्णाय’ इति रूपस्य विभक्ति-वचनं किम् ?

(२६) ‘मूनेः’ इति रूपस्य विभक्ति-वचनं किम् ?

(२७) ‘ऋतवे’ इति रूपस्य विभक्ति-वचनं किम् ?

(२८) ‘धातरम्’ इति रूपस्य विभक्ति-वचनं किम् ?

(२९) 'गोः' इति रूपस्य विभक्ति-वचनं किम् ?

(३०) 'अश्रुनि' इति रूपस्य विभक्ति-वचनं किम् ?

(३१) 'अक्षि' इति रूपस्य विभक्ति-वचनं किम् ?

(३२) 'स्थिरायाः' इति रूपस्य विभक्ति-वचनं किम् ?

(३३) 'सम्प्राप्तिम्' इति रूपस्य विभक्ति-वचनं किम् ?

(३४) 'धमनीषु' इति रूपस्य विभक्ति-वचनं किम् ?

(३५) 'रज्जोः' इति रूपस्य विभक्ति-वचनं किम् ?

(३६) 'वधूनाम्' इति रूपस्य विभक्ति-वचनं किम् ?

(३७) 'मातरि' इति रूपस्य विभक्ति-वचनं किम् ?

(३८) 'रोगिणः' इति रूपस्य विभक्ति-वचनं किम् ?

(३९) 'चन्द्रमसे' इति रूपस्य विभक्ति-वचनं किम्?

(४०) 'मरुतः' इति रूपस्य विभक्ति-वचनं किम् ?

(४१) 'भिषजा' इति रूपस्य विभक्ति-वचनं किम् ?

(४२) 'एतादृशि' इति रूपस्य विभक्ति-वचनं किम् ?

(४३) 'वाचम्' इति रूपस्य विभक्ति-वचनं किम् ?

(४४) ‘योषित्’ इति रूपस्य विभक्ति-वचनं किम् ?

(४५) ‘सुमनसा’ इति रूपस्य विभक्ति-वचनं किम् ?

(४६) ‘त्वम्’ इति रूपस्य विभक्ति-वचनं किम् ?

(४७) ‘मया’ इति रूपस्य विभक्ति-वचनं किम् ?

(४८) ‘एतस्यै’ इति रूपस्य विभक्ति-वचनं किम् ?

(४९) ‘कस्मिन्’ इति रूपस्य विभक्ति-वचनं किम् ?

(५०) ‘यस्य’ इति रूपस्य विभक्ति-वचनं किम् ?

(५१) “अस्मभ्यम्” इति रूपस्य विभक्ति-वचनं किम् ?

(५२) “तव” इति रूपस्य विभक्ति-वचनं किम् ?

(५३) “ सुमनसा” इति रूपस्य विभक्ति-वचनं किम् ?

(५४) “ सुहृद्भिः” इति रूपस्य विभक्ति-वचनं किम् ?

(५५) “ तस्याम्” इति रूपस्य विभक्ति-वचनं किम् ?

(५६) “ जगति” इति रूपस्य विभक्ति-वचनं किम् ?

(५७) “ युष्माकम्” इति रूपस्य विभक्ति-वचनं किम् ?

५८) “ येषु” इति रूपस्य विभक्ति-वचनं किम् ?

(५९) “ भान्वोः” इति रूपस्य विभक्ति-वचनं किम् ?

(६०) “ अस्मत्” इति रूपस्य विभक्ति-वचनं किम् ?

## Topic- 3 (उपसर्गाः)

**Q-५ अधोदत्तस्य धातोः सह एकं एकं उपसर्गः योजित्वा वाक्यानि रचयिता |** **(5 Que x 1 marks each ) (05)**

| | | |
|---|---|---|
| (१) भवति | (१२) करोति | (२३) दिशति |
| (२) वहति | (१३) तिष्ठते | (२४) आस्ते |
| (३) जयते | (१४) जानाति | (२५) विशति |
| (४) हरति | (१५) सहति | (२६) तिष्ठन्ति |
| (५) गच्छति | (१६) गति | (२७) क्रीडति |
| (६) गच्छते | (१७) गमः | (२८) चरते |
| (७) वदते | (१८) वर्तते | (२९) पतति |
| (८) सरति | (१९) नयते | (३०) सरति |
| (९) नयति | (२०) नयसि | (३१) मानम् |
| (१०) तिष्ठति | (२१) दधाति | (३२) वासः |
| (११) चरति | (२२) भवन्ति | (३३) रिक्तम् |

(३४) अक्षः

(३५) कृष्टः

(३६) यानम्

(३७) शयः

(३८) लेखः

(३९) ग्रहः

(४०) पिधाति

(४१) गृह्णाति

(४२) ददाति

(४३) स्निह्यति

(४४) कुप्यति

(४५) भ्रमति

(४६) श्रुणोति

(४७) रोहति

(४९) गतिः

(५०) भावः

(५१) प्र + भवति

(५२) प्र + वहति

(५३) प्र + सरति

(५४) प्र + हरति

(५५) प्र + वेशः

(५६) परा + जयते

(५७) परा + क्रमति

(५८) अप + वदति

(५९) अप + सरति

(६०) अप + करोति

(६१) अप + वादः

(६२) अप + कारः

(६३) सम् + हरति

(६४) सम् + वदते

(६५) सम् + गच्छते

(६६) सम् + वादः

(६७) सम् + हारः

(६८) अनु + हरति

(६८) अनु + तिष्ठति

(६८) अनु + वर्तते

(६८) अनु + नयति

(६८) अनु + चरति

(६९) अव + तिष्ठते

(७०) निस् + सरति

(७१) निस् + चयः

(७२) निस् + चलः

(७३) निर् + वहति

(७४) निर् + आशा

(७५) निर् + आदरः

| | | |
|---|---|---|
| (७६) दुस् + कर्म | (८१) वि + वदते | (८६) आ + चारः |
| (७७) दुर् + गति | (८२) वि + चरति | (८७) आ + गच्छति |
| (७८) दुर् + जनः | (८३) वि + रोधः | (८८) नि + वासः |
| (७९) दुर् + गमः | (८४) आ + हरति | (८९) अधि + तिष्ठति |
| (८०) वि + हरति | (८५) आ + वहति | (९०) उत् + भवति |

## Topic-10 and 11 (प्रत्ययाः,विशेषण विशेष्य)

**Q-६ अधोदत्तस्य प्रत्ययरूपं विलिख्य एकं वाक्यं रचय एवं विशेषणपदानि विशेष्यपदानि स्वीकृत्य वाक्यं रचय |**

**(5 Que x 1 marks each ) (05)**

| | | |
|---|---|---|
| (१) पठ् + क्त्वा | (६) अर्च + तुमुन् | (११) प्र + नम् + ल्यप् |
| (२) गम् + क्त्वा | (७) कथ् + तुमुन् | (१२) वि + ज्ञा+ ल्यप् |
१५. धारयेत्तु सदा वेगान् हितैषी प्रेत्य चेह च ।

लोभेर्ष्याद्वेषमात्सर्यरागादीनां जितेन्द्रियः ॥

१६. अत्युष्णवर्षशीता हि ग्रीष्मवर्षाहिमागमाः ।

सन्धौ साधारणे तेषां दुष्टान् दोषान् विशोधयेत् ॥

१७. श्लेष्मणो विधिना युक्तं तीक्ष्णं वमनरेचनम् ।

अन्नं रूक्षाल्पतीक्ष्णोष्णं कटुतिक्तकषायकम् ॥

१८. कायवाक्चित्तभेदेन कर्मापि विभजेत्त्रिधा ।

कायादिकर्मणो हीना प्रवृत्तिर्हीनसंज्ञिका ॥

१९. तत्रास्थानि स्थितो वायुः पित्तं तु स्वेदरक्तयोः ।

श्लेष्मा शेषेषु तेनैषामाश्रयाश्रयिणां मिथः ॥

२०. गुल्महृद्रोगसम्मोहाः श्रमश्वासाद्विधारितात् ।

हितं विश्रमणं तत्र वातघ्नश्च क्रियाक्रमः ॥

**Q.3 अधोदत्तस्य श्लोकस्य अन्वयं अर्थं च लिखत।**

१.हिताहितं सुखं दुखमायुस्तस्य हिताहितम् ।

मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥

२.यथा सिंहो मृगेन्द्राणां यथाऽनन्तो भुजङ्गमे ।

देवानां च यथा शम्भुस्तथाऽऽत्रेयोऽस्ति वैद्यके ॥

३. सन्ति दानन्यनेकानि किं तैस्तुच्छफलप्रदैः ।

अभीतिदानतुल्यं तु परमेकं न विद्यते ॥

४.तुलभ्रमगुणाकर्षधनुराकर्षणादिभिः ।

आयामो विविधोऽङ्गानां व्यायाम इति कीर्तितः ॥

५.यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः ।

तथैव सेवितो वायुरन्यथा हन्ति साधकम् ॥

६.न स्नानमाचरेद् भुक्त्वा नातुरो न महानिशि ।

न वासोभिः सहाजस्रं,नाविज्ञाते जलाशये ॥

७.अद्भिर्गात्राणि शुद्ध्यन्ति, मनः सत्येन शुद्ध्यति ।

विद्यातपोभ्यां भूतात्मा, बुद्धिर्ज्ञानेन शुद्ध्यति ॥

८.को हि तुलामधिरोहति शुचिना सहजमधुरेण ।

तप्तं विकृतं मथितं तथापि यत्स्नेहमुद्गिरति ॥

९.विद्याघातो ह्यनभ्यासः, स्त्रीणां घातः कुचैलता ।

व्याधीनां भोजनं जीर्णं , शस्त्रोर्घातः प्रपञ्चता ॥

१०.आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम् ।

ज्ञानं हि तेषामधिको विशेषो ज्ञानेन हीनाः पशुभिः समानाः ॥

११. दोषाः कदाचित्कुप्यन्ति जिता लङ्घनपाचनैः ।

ये तु संशोधनैः शुद्धा न तेषां पुनरुद्भवः ॥

१२. सम्यग्गत्या च धातूनामक्षाणां पाटवेन च ।

अनुगृह्णात्यविकृतः, पित्तं पक्त्यूष्मदर्शनैः ॥

१३. रसे रौक्ष्यं श्रमः शोषो ग्लानिः शब्दासहिष्णुता ।

रक्तेऽम्लशिशिरप्रीतिशिराशैथिल्यरूक्षताः ॥

१४.नाभिरामाशयः स्वेदो लसीका रुधिरं रसः ।

दृक् स्पर्शनं च पित्तस्य, नाभिरत्र विशेषतः ॥

१५. यथास्वजन्मोपशयाः स्वतन्त्राः स्पष्टलक्षणाः ।

विपरीतास्ततोऽन्ये तु विद्यादेवं मलानपि ॥

१६. अङ्गभङ्गारुचिग्लानिकार्श्यशूलभ्रमाः क्षुधः ।

तत्र योज्यं लघु स्निग्धमुष्णमल्पं च भोजनम् ॥

१७. कासस्य रोधात्तद्वृद्धिः श्वासारुचिहृदामयाः ।

शोषो हिध्मा च, कार्योऽत्र कासहा सुतरां विधिः ॥

१८. आचार्यः सर्वचेष्टासु लोक एव हि धीमतः ।

अनुकुर्यात्तमेवातो लौकिकेऽर्थे परीक्षकः ॥

१९. त्रिवर्गशून्यं नारम्भं भजेत्तं चाविरोधयन् ।

अनुयायात्प्रतिपदं सर्वधर्मेषु मध्यमाम् ॥

२०.निद्राया मोहमूर्धाक्षिगौरवालस्यजृम्भिकाः ।

अङ्गमर्दश्च तत्रेष्टः स्वप्नः संवाहनानि च ॥

## Q.4 प्रयोगं विपरिणमयत (5 Que.1 mark each)

१. कुम्भकारः घटं करोति ।

२. भृत्यः भारं नयति ।

३. मयूरः पश्यति ।

४. सीता तण्डुलान् पचति ।

५. नृपः कविभ्यः सुवर्णं ददाति ।

६. रामेण वालिं घातयति ।

७. शिष्येण दोषान् त्याजयति ।

८. विप्रेण इन्द्रं याजयन्ति ।

९. चोरेण धनं हारयति ।

१०. बटुना फलम् खादयति ।

११. मणिभद्रः कथां वदति ।

१२. मणिभद्रः वित्तहिनं भवति ।

१३. मणिभद्रः स्वगृहं गच्छति ।

१४. मणिभद्रः अनशनं करोति ।

१५. पद्मनिधिः स्वप्ने दर्शनं ददाति ।

१६. पद्मनिधिः मणिभद्रस्य गृहं गच्छति ।

१७. मणिभद्रः धनं ददाति ।

१८. ब्राह्मणः धनं न ददाति ।

१९. ब्राह्मणः सत्यं त्यजति ।

२०. ब्राह्मणाः महाकालं गच्छन्ति ।

२१. भगवान विष्णुः दैत्यं हन्ति ।

२२. भैरवानन्दः मालां ददाति ।

२३. भैरवानन्दः नाशयति ।

२४. सुवर्णसिद्धिः वनं गच्छति ।

२५. ब्राह्मणः सिंहकारकं मूर्खब्राह्मणकथां कथयति ।

२६. पुनर्वसुः पुण्यमायुर्वेदं ददाति ।

२७. जन्मान्धः दोषान् न पश्यति ।

२८. विद्या विनयं ददाति ।

२९. मया नाटकं दृश्यते ।

३०. ब्राह्मणः प्रतिदिनं गृहकार्यं करोति ।

**Q.5.अधोदत्तानां शब्दानां टिप्पणीर्लिखित ।**

(१) आयुर्वेद: (२) संसर्गः (३) बृहणः (४) गुरुः (५) पञ्चमहाभूतानि (६) कर्म (७) प्रसरः

(८) दुष्यम् (९)विरुद्धाह्नम् (१०) रसः (११) प्रकोपः (१२) दोषगतिः (१३) त्रिगुणम्

(१४) वीर्यम् (१५) आमम् (१६) प्रकृतिः (१७) मलाः (१८) विपाकः(१९) चयः

(२०) योगवाही (२१) अत्यशनम् (२२) देशसात्म्यम् (२३) कार्यकारणभाव (२४) विपाक

(२५) स्थानसंश्रयः (२६) अपथ्यम् (२७) ओकसात्म्यम् (२८) विरुद्धाहारः (२९) गुण

(३०) संनिपातः (३१) स्थानी (३२) स्रोतस् (३३) विशेषः (३४) लङ्घन (३५) शमन

(३६) अनुपान (३७) विकृतिः (३८) कृतान्नवर्गः (३९) बृहणः (४०) सामान्यः (४१) पथ्यम् (४२) कर्म

**Q.6. अधोदत्तानां शब्दस्य निरुक्तिं तथा पर्यायवचनानि च लिखत ।**

(१) मनः (२) धी (३) अग्नि: (४) धृति (५) वात: (६) मूत्रः (७) पुरीषः (८) कफ़:

(९) पित्तम् (१०) प्रज्ञा (११) चक्षुः (१२) आत्मा (१३) रोगि (१४) स्वेदः (१५) श्रोत्रः

(१६)इन्द्रियम् (१७) स्मृति (१८) रक्त (१९) रसना (२०) भेषजचिकित्सा (२१) शुक्र

(२२) जलम् (२३) मज्जा (२४) निदानम् (२५) मनः

**Q.7 संस्कृतभाषायां अनुवदत ।**

1. The Panchtantra is written by Pandit Vishnu Sharma.

2. Panchtantra is an indian collection of moralfull stories.

3. Panchtantra came from two words. they are Panch and Tantra.

4. In a city in the north lived a brahmin whose name was deva sharma.

5. The brahmins wife threw the pot of water on the mongoose and the mongoose died as a result.

6. Manibhadra was a merchant living in the southern city of pataliputra.

7. He was a man of principles who had lost all his wealth.

8. I am padmanidhi ,the treasure collected  by your ancestors.

9. You will hit my head with a stick and i will turn into gold.

10.Truth is seldom pleasant .

11.Fortune favours the brave.

12.Now permit me to go away.

13.The sage lives in the forest.

14.God helps those who help themselves.

15.  No pains,no gains.

**Q.8** **मातृभाषायां  अनुवदत ।**

१. अयं निजः परो वेति गणना लघुचेतसाम् ।

२. महाजनो येन गतः स पन्थाः ।

३. अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत् ।

४. किमयं कोलाहलो नगरमध्ये?

५. उदारचरितानां तु वसुधैव कुटुम्बकम् ।

६. कस्मिन्श्चिदधिष्ठाने चत्वारो ब्राह्मणाः वसन्ति स्म ।

७. अहं देवालये गत्वा  विष्णुं स्मरामि ।

८. जीवः  कष्टेन एवं दुखेन मुह्यति ।

९. वायुः पित्तं कफ़श्चेति त्रयो दोषाः समासतः ।

१०.दोषा एव हि सर्वेषां रोगाणामेककारणम् ।

११. हिमालयात् गङ्गा प्रभवति ।

१२. ग्रीष्मे सूर्यः तपति ।

१३. कवयः वीराणां चरितं कथयन्ति ।

१४. सर्वं धनं तस्मै देहि ।

१५. सः मोदकम् आम्रं च मध्याह्ने भक्षयति ।

१६. अपरीक्ष्य न कर्तव्यं ।

१७. अजीर्णे भेषजं वारि ।

१८. भोजने अमृतं वारि ।

१९. दैववशात् कृष्णसर्पः निष्क्रान्तः ।

२०. अन्नाद् भूतानि जायन्ते ।

२१. दक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम् अस्ति ।

२२. यदा पुरुषः वित्तहिनः भवति तदा मान वा दर्प वा सर्वं प्रणश्यति ।

२३. धनविहीनस्य गृहं रुक्षं भवति ।

२४. मा त्वं वैराग्यम् गच्छ ।

२५. देवशर्मा नाम ब्राह्मणः नगरे प्रतिवसति ।

२६. ब्राह्मणः गृहं मुक्त्वा भिक्षार्थं निर्गतः ।

२७. भोः ! सुबुद्धेः ! गच्छ त्वं स्वगृहं ।

२८. धिङ्मूर्ख ! नाऽहं विद्याया विफ़लतां करोमि ।

२९. बन्धुमध्ये धनहिनजीवितम् न वरं भवति ।

३०. उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।

३१. कस्मिश्चिदधिष्ठाने चत्वारो ब्राह्मणाः वसन्ति स्म ।

३२. ब्राह्मणाः स्वदेशं गच्छामः ।

३३. धर्मस्य त्वरिता गतिः ।

३४. भोः श्रावकः ! धर्मज्ञोऽपि किमेवं वदसि ।

३५. मणिभद्रः वृत्तान्तं अकथयत् ।

३६. अस्ति दाक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम् ।तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसति स्म । तस्य च धर्मार्थकाममोक्षकर्माणि कुर्वतो विधिवशात् धनक्षयः संजातः । ततो विभवक्षयादपमानपरम्परया परं विषादं गतः ।

३७. कस्मिन्श्चिदधिष्ठाने देवशर्मा नाम ब्राह्मणः प्रतिवसति स्म । तस्य भार्या प्रसूता सुतमजनयत् । तस्मिन्नेव दिने नकुली नकुलं प्रसूता । अथ सा सुत वत्सला दारकवत्तमपि नकुलं स्तन्यदानाभ्यङ्गमर्दनादिभिः पुपोष ।

३८. एवं सा नकुलं व्यापाद्य यावत्प्रलपन्ती गृहम् आगच्छति तावत्सुतस्तथैव सुप्तस्तिष्ठति । समीपे कृष्णसर्पं खण्डशः कृतमवलोक्य पुत्रवधशोकेनात्मशिरो वक्षःस्थलं च ताडयितुमारब्धा । अत्रान्तरे ब्राह्मणो गृहीतनिर्वापः समायातो यावत्पश्यति,तावत्पुत्र शोकाभितप्ता ब्राह्मणी प्रलपति ।

३९. एवं क्रमेण गच्छन्तोऽवन्तिं प्राप्ताः । तत्र क्षिप्राजले कृतस्नाना महाकालं प्रणम्य यावन्निर्गच्छन्ति, तावद्भैरवानन्दो नाम योगी संमुखो बभूव । ततस्तं ब्राह्मणोचितविधिना संभाव्य तेनैव सह तस्य मठं जग्मुः ।

४०. कस्मिन्श्चिज्जलाशये शतबुद्धिः सहस्रबुद्धिश्च द्वौ मत्स्यौ निवसतः स्म । अथ तयोरेकबुद्धिर्नाम मण्डूको मित्रतां गतः । एवं ते त्रयोऽपि वेलायां कश्चित्कालं सुभाषित गोष्ठीसुखमनुभूय भूयोऽपि सलिलं प्रविशन्ति ।

- **Long answer questions (LAQ)**

## Topic 4

**Q.1 Comprehend and write the summary and moral of the story in Sanskrit.**

1. क्षपणककथा
2. ब्राह्मणीनकुलकथा
3. मूर्खपण्डितकथा
4. लोभाविष्टचक्रधरकथा
5. सिंहकारकमूर्खब्राह्मणकथा

## Topic 2

**Q.2 Write the Definition and shortnote. (2 Que.× 5 marks for each)**

1. आयुर्वेदः
2. पञ्चमहाभूतानि
3. त्रिगुणम्
4. दोषाः
5. मलाः
6. दूष्यम्
7. संसर्गः
8. सन्निपातः
9. द्रव्यः
10. गुणः
11. कर्म
12. सामान्यः
13. विशेषः
14. गुरुः
18. सात्म्यम्
19. चयः
20. प्रकोपः
21. प्रसरः
22. स्थानसंश्रयः
23. दोषगतिः
24. भेदः
25. रसः
26. वीर्यम्
27. विपाकः
28. कार्यकारणभावः
29. स्रोतस्
30. कोष्ठः
31. आमम्
35. बृहणः
36. विष्टम्भिः
37. वेगः
38. ओकसात्म्यम्
39. देशसात्म्यम्
40. अत्यशनम्
41. स्थानी
42. अवस्थापकः
43. पथ्यम्
44. अपथ्यम्
45. कृत्तान्नवर्गः
46. योगवाही
47. शोधनम्
48. शमनम्

| | | | | | |
|---|---|---|---|---|---|
| 15. | लघुः | 32. | विरुद्धाह्नम् | 49. | लङ्घनम् |
| 16. | प्रकृतिः | 33. | विरुद्धाहारः | 50. | अनुपानम् |
| 17. | विकृतिः | 34. | विदाहिः | | |

## Topic 3

**Q.3 (A) Answer the Questions in Complete Sentences. (5 Que. × 1 marks for each)**

1. Who is the Author of Ashtangahriday ?
2. How many chapters are there in Ashtangahriday ?
3. How many chapters are there in Sutrasthan of Ashtangahridaya ?
4. What is the name of the first chapter of Ashtangahridaya ?
5. How did Ayurveda incarnate ?
6. Write the names of 8 parts of Ayurveda ?
7. What are the three defects ?
8. How many types of Prakriti are formed from Vatadi Doshas ?

9. What are the प्राकृतगुणः of Vatadi Doshas ?

10. What is संसर्गः and संन्निपातः ?

11. Write the names of seven metals.

12. How many types of matter are there by difference of effect ?

13. Write the types and names of विपाकः.

14. Give the cause of disease and cure.

15. How should the doctor examine the patient ?

16. How should the doctor examine the disease ?

17. How are physical and mental defects treated ?

18. Mention the चतुष्पादम् of medicine.

19. Explain the qualities of Vaidya and medicine.

20. Mention the qualities of attendant and patient.

21. What are the curable diseases ?

22. What are the कृच्छ्रसाध्यः diseases ?

23. What is याप्यः disease ?

24. What are incurable diseases ?

25. Which patient should be abandoned ?

26. What is the name of the second chapter of Ashtanghridaya ?

27. According to the Ashtangahriday, at what time should a person wake up?

28. According to Ashtangahriday, which अंजनम् is the best ?

29. What are the benefits of अभ्यंगम् ?

30. Write the benefits of exercise.

31. What diseases are caused by over-exercise?

32. Write the benefits of उद्वर्तनम्.

33. What are the virtues of bath described in the chapter on दीनचर्या ?

34. What is the name of the fourth chapter of Ashtangahridaya?

35. What are a अधारणीयवेगः ?

36. Mention the diseases and their treatment caused by अधोवातवेगावरोधनम् .

37. Mention the diseases caused by मलवेगावरोधनम् and their treatment.

38. Mention the diseases caused by मूत्रवेगावरोधनम् and their treatment.

39. Mention the diseases caused by तृष्णावेगावरोधनम् and their treatment.

40. Mention the diseases caused by क्षुधावेगावरोधनम् and their treatment.

41. Mention the diseases caused by निद्रावेगावरोधनम् and their treatment.

42. Mention the diseases caused by कासवेगावरोधनम् and their treatment.

43. Mention the diseases caused by श्रमःश्वासवेगावरोधनम् and their treatment.

44. Mention the diseases caused by जृम्भावेगावरोधनम् and their treatment.

45. Mention the diseases caused by अश्रुवेगावरोधनम् and their treatment.

46. Write the धारणीयवेगः.

47. What is आगन्तुकः disease?

48. Write the remedies for seasonal diseases.

49. Write the name of the eleventh chapter of Ashtangahridaya.

50. What are the best कर्म of metals?

51. Give the definition and location of ओजः.

52. State the importance of defects.

53. Write the name of the 12th chapter of Ashtangahridaya.

54. Write the place of Vata.

55. Write the location of पित्तम्.

56. Write the place of कफः.

57. What are the five types of वायुः ?

58. Write the differences and names of पित्तम्.

59. Write the difference and name of कफः.

60. Write the accumulation, outbreak and mitigation of defects according to season.

61. What are the three types causes of वातादिः disease ?

62. What are the three types of Karma ?

63. Write the three types of diseases of Vatadi Dosha.

64. What is external route of disease ?

65. What is called internal path ?

66. What is the middle path ?

67. What are the three distinctions of disease in the chapter on दोषभेदीयम् ?

68. how are the types of examination of the patient ?

69. What is the name of the 13th chapter of Ashtanghridaya?

70.. What is विशुद्धः चिकित्सा ?

71. Write the period of consumption of the drug depicted in the chapter on दोषोपक्रमणीयम्.

72. Name the 14th chapter of Ashtangahridaya.

73. What are the two types of treatment of disease ?

74. write type and Name of लंघनम् therapy.

75. Whose creation is the vaidhyakiyasubhashitsahity ?

76. How many chapters are there in the vaidhyakiyasubhashitsahity ?

77. What is Ayurveda called ?

78. What is the remedy for the defects of शरीरम्, भाषा and बुद्धिः ?

79. How many mental defects are there ?

80. What are the four donations according to vadyakeeyasubhashitsahity ?

81. According to the vaidhyakiyasubhashitsahity what is called healthy ?

82. What is celibacy ?

83. When should not take bath ?

84. What to drink at the end of the meal.

85. Who does not see the defects according to the vadyakeeyasubhashitsahity ?

86. What is the difference between विषः and विषयः ?

## Topic 1

**Q.3 (B) Write Synonyms. (5 Que. 1 marks for each)**

1. आयुः
2. शरीरम्
3. मनः
4. अग्निः
5. जलम्
6. वातः
7. पित्तम्
8. कफः
9. रसः
10. रक्तम्
11. मांसम्
12. मेदः
13. अस्थिः
14. मज्जा
15. शुक्रः
16. इन्द्रियम्
17. श्रोत्रः
18. चक्षुः
19. रसना
20. घ्राणम्
21. धीः
22. धृतिः
23. स्मृतिः
24. बुद्धिः
25. मतिः
26. प्रज्ञा
27. मूत्रम्
28. पुरीषम्
29. स्वेदः
30. आत्मा
31. रोगः
32. निदानम्
33. रोगी
34. भेषजचिकित्सा

## Topic 3

**Q.4 Write the following Verses पदच्छेदं विग्रहवाक्यम् अन्वयः वाक्यार्थः and भावार्थः ।**

**(5 Que. × 2 marks for each)**

1. रागादिरोगान् सततानुषक्तानशेषकायप्रसृतानशेषान् ।

   औत्सुक्यमोहारतिदाञ्जघान यो अपूर्ववैद्याय नमोऽस्तु तस्मै ॥

2. आयुःकामयमानेन धर्मार्थसुखसाधनम् ।

   आयुर्वेदोपदेशेषु विधेयः परमादरः ॥

3. ब्रह्मा स्मृत्वाऽऽयुषो वेदं प्रजापतिमजिग्रहत् ।

   सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान्मुनीन् ॥

4. उष्णेन युक्ता रूक्षाद्या वायोः कुर्वन्ति सञ्चयम् ।

   शीतेन कोपमुष्णेन शमं स्निग्धादयो गुणाः ॥

5. वायु: पित्तं कफश्चेति त्रयो दोषा: समासत: ।

   विकृताविकृता देहं घ्नन्ति ते वर्त्तयन्ति च ॥

6. ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रया: ।

   वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगा: क्रमात् ॥

7. तैर्भवेद्विषम: तीक्ष्णो मन्दश्चाग्नि: समै: सम: ।

   कोष्ठ: क्रूरो मृदुर्मध्यो मध्य: स्यात्तै: समैरपि ॥

8. शुक्रार्तवस्थै: जन्मादौ विषेणेव विषक्रिमे:।

तैश्च तिस्र: प्रकृतयो हीनमध्योत्तमा: पृथक्॥

9. तत्र रूक्षो लघुः शीतः खरः सूक्ष्मश्चलोऽनिलः।

पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रं सरं द्रवम् ॥

10. रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः ।

षड् द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः ॥

11. तत्राद्या मारुतं घ्नन्ति त्रयः तिक्तादयः कफम् ।

कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते ॥

12. गुरुमन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिरा: ।

गुणा: ससूक्ष्मविशदा: विशतिः सविपर्यया: ॥

13. कालाकर्मणां योगो हीनमिथ्यातिमात्रकः।

सम्यग्योगश्च विज्ञेयो रोगारोग्यैककारणम् ॥

14. निजागन्तुविभागेन तत्र रोगा द्विधा स्मृताः ।

तेषां कायमनोभेदादधिष्ठानमपि द्विधा ॥

15. दर्शनस्पर्शनप्रश्नैः परीक्षेत च रोगिणम् ।

रोगं निदानप्राग्रूपलणोपशयाप्तिभिः ॥

16. शरीरजानां दोषाणां क्रमेण परमौषधम् ।

बस्तिर्विरेको वमनं तथा तैलं घृतं मधु ॥

17. भिषक् द्रव्याण्युपस्थाता रोगी पादचतुष्टयम् ।

चिकित्सितस्य निर्दिष्टं, प्रत्येकं तच्चतुर्गुणम् ॥

18. दक्षस्तीर्थात्तशास्त्रार्थो दृष्टकर्मा शुचिर्भिषक् ।

बहुकल्पं बहुगुणं सम्पन्नं योग्यमौषधम् ॥

19. अनुरक्तः शुचिर्दक्षो बुद्धिमान् परिचारकः ।

आढ्यो रोगी भिषग्वश्यो ज्ञापकः सत्त्ववानपि ॥

20. शरीरचिन्तां निर्वर्त्य कृतशौचविधिस्ततः ॥

अर्कन्यग्रोधखदिरकरञ्जककुभादिजम् ॥

21. सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भजेत् ।

चक्षुस्तेजोमयं तस्य विशेषाच्छलेष्मतो भयम् ॥

22. ताम्बूलं क्षतपित्तास्ररूक्षोत्कुपितचक्षुषाम् ।

विषमूर्च्छामदार्तानामपथ्यं शोषिणामपि ॥

23. अभ्यङ्गमाचरेन्नित्यं, स जराश्रमवातहा ।

दृष्टिप्रसादपुष्ट्यायुःस्वप्नसुत्वक्त्वदार्ढ्यकृत् ॥

24. शिरःश्रवणपादेषु तं विशेषेण शीलयेत् ।

वर्ज्योऽभ्यङ्गः कफग्रस्तकृतसंशुद्ध्यजीर्णिभिः ॥

25. लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्मेदसः क्षयः ।

विभक्तघनगात्रत्वं व्यायामादुपजायते ॥

26. उद्वर्तनं कफहरं मेदसः प्रविलायनम् ।

स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम् ॥

27. दीपनं वृष्यमायुष्यं स्नानम् ऊर्जाबलप्रदम् ।

कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मजित् ॥

28. उष्णाम्बुनाऽधःकायस्य परिषेको बलावहः ।

तेनैव तूत्तमाङ्गस्य बलहृत् केशचक्षुषाम् ॥

29. जीर्णे हितं मितं चाद्यात् न वेगानीरयेत् बलात् ।

न वेगितोऽन्यकार्य: स्यात् न अजित्वा साध्यं आमयम् ॥

30. सुखार्था: सर्वभूतानां मता: सर्वा: प्रवृत्तय: ।

सुखं च न विना धर्मात् तस्माद्धर्मपरो भवेत् ॥

31. हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृते ।

सम्भिन्नालापं व्यापादमभिध्यां दृग्विपर्ययम् ॥

32. उपकारप्रधानः स्यादपकारपरेऽप्यरौ ।

सम्पद्विपत्स्वेकमना हेतावीर्ष्येत् फले न तु ॥

33. काले हितं मितं ब्रूयादविसंवादि पेशलम् ।

पूर्वाभिभाषी, सुमुखः सुशीलः करुणामृदुः ॥

34. नैकः सुखी, न सर्वत्र विश्रब्धो, न च शङ्कितः ॥

नकश्चिदात्मनः शत्रुनात्मानं कस्यचिद्रिपुम् ॥

35. त्रिवर्गशून्यं नारम्भं भजेत्तं चाविरोधयन् ।

अनुयायात्प्रतिपदं सर्वधर्मेषु मध्यमाम् ॥

36. नीचरोमनखश्मश्रुनिर्मलाङ्घ्रिमलायनः ।

स्नानशीलः सुसुरभिः सुवेषोऽनुल्बणोज्ज्वलः ॥

37. चैत्यपूज्यध्वजाशस्तच्छायाभस्मतुषाशुचीन् ।

नाक्रामेच्छर्करालोष्टबलिस्नानभुवो न च ॥

38. देहवाक्चेतसां चेष्टाः प्राक् श्रमाद्विनिवर्तयेत् ।

नोर्ध्वजानुश्चिरं तिष्ठेन्नक्तं सेवेत न द्रुमम् ॥

39. तथा चत्वरचैत्यान्तश्चतुष्पथसुरालयान् ।

सूनाटवीशून्यगृहश्मशानानि दिवाऽपि न ॥

40. सर्वथेक्षेत नादित्यं, न भारं शिरसा वहेत् ।

नेक्षेत प्रततं सूक्ष्मं दीप्तामेध्याप्रियाणि च ॥

41. आचार्यः सर्वचेष्टासु लोक एव हि धीमतः ।

अनुकुर्यात्तमेवातो लौकिकेऽर्थे परीक्षकः ॥

42. आर्द्रसन्तानता त्यागः कायवाक्चेतसां दमः ।

स्वार्थबुद्धिः परार्थेषु पर्याप्तमिति सद्व्रतम् ॥

43. वेगान्न धारयेद्वातविण्मूत्रक्षवतृट्क्षुधाम् ।

निद्राकासश्रमश्वासजृम्भाश्रुच्छर्दिरेतसाम् ॥

44. अधोवातस्य रोधेन गुल्मोदावर्तरुक्क्लमाः ।

वातमूत्रशकृत्सङ्गदृष्ट्यग्निवधहृद्गदाः ॥

45. उद्गारस्यारुचिः कम्पो विबन्धो हृदयोरसोः ।

आध्मानकासहिध्माश्च हिध्यावत्तत्र भेषजम् ॥

46. शोषाङ्गसादबाधिर्यसम्मोहभ्रमहृद्गदाः ।

तृष्णाया निग्रहात् तत्र शीतः सर्वो विधिर्हितः ॥

47. अङ्गभङ्गारुचिग्लानिकार्श्यशूलभ्रमाः क्षुधः ।

तत्र योज्यं लघु स्निग्धमुष्णमल्पं च भोजनम् ॥

48. निद्राया मोहमूर्धाक्षिगौरवालस्यजृम्भिकाः ।

अङ्गमर्दश्च तत्रेष्टः स्वप्नः संवाहनानि च ॥

49. कासस्य रोधात्तद्वृद्धिः श्वासारुचिहृदामयाः ।

शोषो हिध्मा च, कार्योऽत्र कासहा सुतरां विधिः ॥

50. गुल्महृद्रोगसम्मोहाः श्रमश्वासाद्विधारितात् ।

हितं विश्रमणं तत्र वातघ्नश्च क्रियाक्रमः ॥

51. पीनसाक्षिशिरोहृद्रुङ्मन्यास्तम्भारुचिभ्रमाः ।

सगुल्मा बाष्पतस्तत्र स्वप्नो मद्यं प्रियाः कथाः ॥

52. धारयेत्तु सदा वेगान् हितैषी प्रेत्य चेह च ।

लोभेर्ष्याद्वेषमात्सर्यरागादीनां जितेन्द्रियः ॥

53. यतेत च यथा कालं मलानां शोधनं प्रति ।

अत्यर्थसञ्चितास्ते हि क्रुद्धाः स्युर्जीवितच्छिदः ॥

54. दोषाः कदाचित्कुप्यन्ति जिता लङ्घनपाचनैः ।

ये तु संशोधनैः शुद्धा न तेषां पुनरुद्भवः ॥

55. यथाक्रमं यथायोगमत ऊर्ध्वं प्रयोजयेत् ।

रसायनानि सिद्धानि वृष्ययोगांश्च कालवित् ॥

56. ये भूतविषवाय्वग्निक्षतभङ्गादिसम्भवाः ।

रागद्वेषभयाद्याश्च ते स्युरागन्तवो गदाः ॥

57. शीतोद्भवं दोषचयं वसन्ते विशोधयन्  ग्रीष्मजमभ्रकाले ।

घनात्यये वार्षिकमाशु सम्यक्प प्राप्नोति रोगानृतुजान्न जातु ॥

58. नित्यं हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः ।

दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः ॥

59. दोषधातुमलाः  मूलं सदा देहस्य  तं चलः ।

उत्साहोच्छवासनिश्वासचेष्टावेगप्रवर्तनैः ॥

60. प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे ।

गर्भोत्पादश्च धातूनां श्रेष्ठं कर्म क्रमात् स्मृतम् ॥

61. अस्थ्यध्यस्थ्यधिदन्तांश्च मज्जा नेत्राङ्गगौरवम् ।

पर्वसु स्थूलमूलानि कुर्यात्कृच्छ्राण्यरूंषि च ॥

62. कुक्षावाध्मानमाटोपं गौरवं वेदनां शकृत् ।

मूत्रं तु बस्तिनिस्तोदं कृतेऽप्यकृतसंज्ञताम् ॥

63. स्वेदोऽतिस्वेददौर्गन्ध्यकण्डूरेवं च लक्षयेत् ।

दूषिकादीनपि मलान् बाहुल्यगुरुतादिभिः॥

64. लिङ्गं क्षीणेऽनिलेऽङ्गस्य सादोऽल्पं भाषितेहितम् ।

संज्ञामोहस्तथा श्लेष्मवृद्धयुक्तामयसम्भवः ॥

65. पित्ते मन्दोऽनलः शीतं प्रभाहानिः कफे भ्रमः ।

श्लेष्माशयानां शून्यत्वं हृद्रवः श्लथसन्धिता ॥

66. रसे रौक्ष्यं श्रमः शोषो ग्लानिः शब्दासहिष्णुता ।

रक्तेऽम्लशिशिरप्रीतिशिराशैथिल्यरूक्षताः ॥

67. मांसेऽक्षग्लानिगण्डस्फिक्शुष्कतासन्धिवेदनाः ।

मेदसि स्वपनं कट्याः प्लीह्नो वृद्धिः कृशाङ्गता ॥

68. अस्थ्यस्थितोदः शदनं दन्तकेशनखादिषु ।

अस्थ्नां मज्जनि सौषिर्यं भ्रमस्तिमिरदर्शनम् ॥

69. पुरीषे वायुरन्त्राणि सशब्दो वेष्टयन्निव ।

कुक्षौ भ्रमति यात्यूर्ध्वं हृत्पार्श्वे पीडयन् भृशम् ॥

70. मूत्रेऽल्पं मूत्रयेत् कृच्छ्राद्विवर्णं सास्रमेव वा ।

स्वेदे रोमच्युतिः स्तब्धरोमता स्फुटनं त्वचः ॥

71. मलानामतिसूक्ष्माणां दुर्लक्ष्यं लक्षयेत्क् क्षयम् ।

स्वमलायनसंशोषतोदशून्यत्वलाघवैः ॥

72. दोषादीनां यथास्वं च विद्याद् वृद्धिक्षयौ भिषक् ।

क्षयेण विपरीतानां गुणानां वर्धनेन च ॥

73. वृद्धिं मलानां सङ्गाच्च क्षयं चातिविसर्गतः ।

मलोचितत्वाद् हेहस्य क्षयो वृद्धेस्तु पीडनः ॥

74. तत्रास्थानि स्थितो वायुः पित्तं तु स्वेदरक्तयोः ।

श्लेष्मा शेषेषु तेनैषामाश्रयाश्रयिणां मिथः ॥

75. विशेषाद्रक्तवृद्ध्युत्थान् रक्तस्रुतिविरेचनैः ।

मांसवृद्धिभवान् रोगान् शस्त्रक्षाराग्निकर्मभिः ॥

76. स्थौल्यकार्श्योपचारेण मेदोजानस्थिसंक्षयात् ।

जातान् क्षीरघृतैस्तिक्तसंयुतैर्वस्तिभिस्तथा ॥

77. विड्वृद्धिजानतीसारक्रियया विट्क्षयोद्भवान् ।

मेषाजमध्यकुल्माषयवमाषद्वयादिभिः ॥

78. मूत्रवृद्धिक्षयोत्थांश्च मेहकृच्छ्रचिकित्सया ।

व्यायामाभ्यञ्जनस्वेदमद्यैः स्वेदक्षयोद्भवान् ॥

79. दोषा दुष्टा रसैर्धातून् दूषयन्त्युभये मलान् ।

अधो द्वे सप्त शिरसि खानि स्वेदवहानि च ॥

80. ओजस्तु तेजो धातूनां शुक्रान्तानां परं स्मृतम् ।

हृदयस्थमपि व्यापि देहस्थितिनिबन्धनम् ॥

81. स्निग्धं सोमात्मकं शुद्धमीषल्लोहितपीतकम् ।

यन्नाशे नियतं नाशो यस्मिंस्तिष्ठति तिष्ठति ॥

82. ओजः क्षीयेत कोपक्षुद्ध्यानशोकश्रमादिभिः ।

बिभेति दुर्बलोऽभीक्ष्णं ध्यायति व्यथितेन्द्रियः ॥

83. यथाबलं यथास्वं च दोषा वृद्धा वितन्वते ।

रूपाणि जहति क्षीणाः समाः स्वं कर्म कुर्वते ॥

84. य एव देहस्य समा विवृद्ध्यै ते एव दोषा विषमा वधाय ।

यस्मादतस्ते हितचर्ययैव क्षयाद्विवृद्धेरिव रक्षणीयाः ॥

85. पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ।

स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥

86. नाभिरामाशयः स्वेदो लसीका रुधिरं रसः ।

दृक् स्पर्शनं च पित्तस्य नाभिरत्र विशेषतः ॥

87. उरःकण्ठशिरःक्लोमपर्वाण्यामाशयो रसः ।

मेदो घ्राणं च जिह्वा च कफस्य सुतरामुरः ॥

88. उर: स्थानमुदानस्य नासानाभिगलांश्चरेत् |

वाक्प्रवृत्तिप्रयत्नोर्जाबलवर्णस्मृतिक्रियः ॥

89. समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वतः ।

अन्नं गृह्णाति पचति विवेचयति मुञ्चति ॥

90. अपानोऽपानगः श्रोणिबस्तिमेढ्रोरुगोचरः ।

शुक्रार्तवशकृन्मूत्रगर्भनिष्क्रमणक्रियः ॥

91. आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात् ।

बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात् ॥

92. साधकं हृद्गतं पित्तंरूपालोचनतः स्मृतम् ।

दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजनात्त्वचः ॥

93. उष्णेन युक्ता रूक्षाद्या वायोः कुर्वन्ति सञ्चयम् ।

शीतेन कोपमुष्णेन शमं स्निग्धादयो गुणाः ॥

94. शीतेन युक्तास्तीक्ष्णाद्याश्चयं पित्तस्य कुर्वते ।

उष्णेन कोपं मन्दाद्याः शमं शीतोपसंहिताः ॥

95. शीतेन युक्ताः स्निग्धाद्याः कुर्वते श्लेष्मणश्चयम् ।

उष्णेन कोपं तेनैव गुणा रूक्षादयः शमम् ॥

96. चयो वृद्धिः स्वधाम्न्येव प्रद्वेषो वृद्धिहेतुषु ।

विपरीतगुणेच्छा च कोपस्तून्मार्गगामिता ।

97. लिङ्गानां दर्शनं स्वेषामस्वास्थ्यं रोगसम्भवः ।

स्वस्थानस्थस्य समता विकारासम्भवः शमः ॥

98. चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिषु ।

वर्षादिषु तु पित्तस्य, श्लेष्मणः शिशिरादिषु ॥

99. चीयते लघुरूक्षाभिरोषधीभिः समीरणः ।

तद्विधस्तद्विधे देहे कालस्यौष्ण्यान्न कुप्यति ॥

100. अद्भिरम्लविपाकाभिरोषधीभिश्च तादृशम् ।

पित्तं याति चयं कोपं न तु कालस्य शैत्यतः ॥

101. चीयते स्निग्धशीताभिरुदकौषधिभिः कफः ।

तुल्येऽपि काले देहे च स्कन्नत्वान्न प्रकुप्यति ॥

102. इति कालस्वभावोऽयमाहारादिवशात्पुनः ।

चयादीन् यान्ति सद्योऽपि दोषाः कालेऽपि वा न तु ॥

103. व्याप्नोति सहसा देहमापादतलमस्तकम् ।

निवर्तते तु कुपितो मलोऽल्पाल्पं जलौघवत् ॥

104. विकारजातं विविधं त्रीन् गुणान्नातिवर्तते ।

तथा स्वधातुवैषम्यनिमित्तमपि सर्वदा ॥

105. अर्थैरसात्म्यैः संयोगः कालः कर्म च दुष्कृतम् ।

हीनातिमिथ्यायोगेन भिद्यते तत्पुनस्त्रिधा ॥

106. कायवाक्चित्तभेदेन कर्मापि विभजेत्त्रिधा ।

कायादिकर्मणो हीना प्रवृत्तिर्हीनसंज्ञिका ॥

107. अतियोगोऽतिवृत्तिस्तु वेगोदीरणधारणम् ।

विषमाङ्गक्रियारम्भपतनस्खलनादिकम् ॥

108. भाषणं सामिभुक्तस्य रागद्वेषभयादि च ।

कर्म प्राणातिपातादि दशधा यच्च निन्दितम् ॥

109. शाखा रक्तादयस्त्वक् च बाह्यरोगायनं हि तत् ।

तदाश्रया मषव्यङ्गगण्डालज्यर्बुदादयः ॥

110. शिरोहृदयबस्त्यादिमर्माण्यस्थ्नां च सन्धयः ।

तन्निबद्धाः शिरास्नायुकण्डराद्याश्च मध्यमः ॥

111. स्वेदः क्लेदः स्रुतिः कोथः सदनं मूर्च्छनं मदः ।

कटुकाम्लौ रसौ वर्णः पाण्डुरारुणवर्जितः ॥

112. दृष्टापचारजः कश्चित्कश्चित्पूर्वापराधजः ।

तत्सङ्कराद्भवत्यन्यो व्याधिरेवं त्रिधा स्मृतः ॥

113. यथानिदानं दोषोत्थः कर्मजो हेतुभिर्विना ।

महारम्भोऽल्पके हेतावातङ्को दोषकर्मजः ॥

114. विपक्षशीलनात्पूर्वः कर्मजः कर्मसङ्क्षयात् ।

गच्छत्युभयजन्मा तु दोषकर्मक्षयात्क्षयम् ॥

115. द्विधा स्वपरतन्त्रत्वाद्व्याधयोऽन्त्याः पुनर्द्विधा ।

पूर्वजाः पूर्वरूपाख्या जाताः पश्चादुपद्रवाः ॥

116. यथास्वजन्मोपशयाः स्वतन्त्राः स्पष्टलक्षणाः ।

विपरीतास्ततोऽन्ये तु विद्यादेवं मलानपि ॥

117. स एव कुपतो दोषः समुत्थानवशेषतः ।

स्थानान्तराणि च प्राप्य विकारान् कुरुते बहून् ॥

118. गुर्वल्पव्याधिसंस्थानं सत्त्वदेहबलाबलात् ।

दृश्यतेऽप्यन्यथाकारं तस्मिन्नवहितो भवेत् ॥

119. गुरुं लघुमिति व्याधिं कल्पयंस्तु भिषग्ब्रुवः ।

अल्पदोषाकलनया पथ्ये विप्रतिपद्यते ॥

120. ततोऽल्पमल्पवीर्यं वा गुरुव्याधौ प्रयोजितम् ।

उदीरयेत्तरां रोगान् संशोधनमयोगतः ॥

121. शोधनं त्वतियोगेन विपरितं विपर्यये ।

क्षिणुयान्न मलानेव केवलं वपुरस्यति ॥

122. अतोऽभियुक्तः सततं सर्वमालोच्य सर्वथा ।

तथा युञ्जीत भैषज्यमारोग्याय यथा ध्रुवम् ॥

123. वातस्योपक्रमः स्नेहः स्वेदः संशोधनं मृदु ।

स्वादुम्ललवणोष्णानि भोज्यान्यभ्यङ्गमर्दनम् ॥

124. वेष्टनं त्रासनं सेको मद्यं पैष्टिकगौडकम् ।

स्निग्धोष्णा बस्तयो बस्तिनियमः सुखशीलता ।

125. दीपनैः पाचनैः सिद्धाः स्नेहाश्चानेकयोनयः ।

विशेषान्मेद्यपिशितरसतैलानुवासनम् ॥

126. पित्तस्य सर्पिषः पानं स्वादुशीतैर्विरेचनम् ।

स्वादुतिक्तकषायाणि भोजनान्यौषधानि च ॥

127. सुगन्धिशीतहृद्यानां गन्धानामुपसेवनम् ।

कण्ठेगुणानां हाराणां मणीनामुरसा धृतिः ॥

128. कर्पूरचन्दनोशीरैरनुलेपः क्षणे क्षणे ।

प्रदोषश्चन्द्रमाः सौधं हारि गीतं हिमोऽनिलः ।

129. अयन्त्रणसुखं मित्रं पुत्रं सन्दिग्धमुग्धवाक् ।

छन्दानुवर्तिनो दाराः प्रियाः शीलविभूषताः ॥

130. शीताम्बुधारागर्भाणि गृहाण्युद्यानदीर्घिकाः ।

सुतीर्विपुलस्वच्छसलिलाशयसैकते ॥

131. साम्भोजजलतीरान्ते कायमाने द्रुमाकुले ।

सौम्या भावाः पयः सर्पिर्विरेकश्च विशेषतः ॥

132. श्लेष्मणो विधिना युक्तं तीक्ष्णं वमनरेचनम् ।

अन्नं रूक्षाल्पतीक्ष्णोष्णं कटुतिक्तकषायकम् ॥

133. दीर्घकालस्थितं मद्यं रतिप्रीतिः प्रजागरः ।

अनेकरूपो व्यायामश्चिन्ता रूक्षं विमर्दनम् ।

134. विशेषाद्वमनं यूषः क्षौद्रं मेदोघ्नमौषधम् ।

धूमोपवासगण्डूषा निःसुखत्वं सुखाय च ॥

135. ग्रैष्मैः प्रायो मरुत्पित्ते वासन्तः कफमारुते ।

मरुतो योगवाहित्वात् कफपित्ते तु शारदः ॥

136. चय एव जयेद्दोषं कुपितं त्वविरोधयन् ।

सर्वकोपे बलयांसं शेषदोषाविरोधतः ॥१५॥

137. प्रयोगः शमयेद् व्याधिमेकं यो अन्यमुदीरयेत् ।

नाऽसौ विशुद्धः शुद्धस्तु शमयेद्यो न कोपयेत् ॥

138. व्यायामादूष्मणस्तैक्ष्ण्यादहिताचरणादपि ।

कोष्ठाच्छाखास्थिमर्माणि द्रुतत्वान्मारुतस्य च ॥

139. तत्रस्थाश्च विलम्बेरन् भूयो हेतुप्रतीक्षिणः ।

ते कालादिबलं लब्ध्वा कुप्यन्त्यन्याश्रयेष्वपि ॥

140. प्रायस्तिर्यग्गता दोषाः क्लेशयन्त्यातुरांश्चिरम् ।

कुर्यान्न तेषु त्वरया देहाग्निबलवित् क्रियाम् ॥

141. शमयेत्तान् प्रयोगेण सुखं वा कोष्ठमानयेत् ।

ज्ञात्वा कोष्ठप्रपन्नांश्च यथासन्नं विनिर्हरेत् ॥

142. स्रोतोरोधबलभ्रंशगौरवानिलमूढताः ।

आलस्यापिक्तिनिष्ठीवमलसङ्गारुचिक्लमाः ॥

143. ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् ।

दुष्टमामाशयगतं रसमामं प्रचक्षते ॥

144. अन्ये दोषेभ्य एवातिदुष्टेभ्योऽन्योन्यमूर्च्छनात् ।

कोद्रवेभ्यो विषस्येव वदन्त्यामस्य सम्भवम् ॥

145. आमेन तेन सम्पृक्ता दोषा दूष्याश्च दूषिताः ।

सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ॥

146. सर्वदेहप्रविसृतान् सामान् दोषान् न निर्हरेत् ।

लीनान् धातुष्वनुत्क्लिष्टान् फलादामाद्रसानिव ॥

147. पाचनैर्दीपनैः स्नेहैस्तान् स्वेदैश्च परिष्कृतान् ।

शोधयेच्छधनैः काले यथासन्नं यथाबलम् ॥

148. हन्त्याशु युक्तं वक्त्रेण द्रव्यमामाशयान्मलान् ।

घ्राणेन चोर्ध्वजत्रूत्थान् पक्वाधानाद् गुदेन च ॥

149. श्रावणे कार्तिके चैत्रे मासि साधारणे क्रमात् ।

ग्रीष्मवर्षाहिमचितान् वाय्वादीनाशु निर्हरेत् ॥

150. अत्युष्णवर्षशीता हि ग्रीष्मवर्षाहिमागमाः ।

सन्धौ साधारणे तेषां दुष्टान् दोषान् विशोधयेत् ॥

151. युञ्ज्यादनन्नमन्नादौ मध्येऽन्ते कवलान्तरे ।

ग्रासे ग्रासे मुहुः सान्नं सामुद्गं निशि चौषधम् ॥

152. कफोद्रेके गदेऽनन्नं बलनो रोगरोगिणोः ।

अन्नादौ विगुणेऽपाने समाने मध्य ईष्यते ॥

153. व्यानेऽन्ते प्रातराशस्य सायमाशस्य तूत्तरे ।

ग्रासग्रासान्तयोः प्राणे प्रदुष्टे मातरिश्वनि ।

154. मुहुर्मुहुर्विषच्छर्दिहिध्मातृट्श्वासकासिषु ।

योज्यं सभोज्यं भैषज्यं भोज्यैश्चित्रैररोचके ॥

155. कम्पाक्षेपकहिध्मासु सामुद्गं लघुभोजिनाम् ।

ऊर्ध्वजत्रुविकारेषु स्वप्नकाले प्रशस्यते ॥

156. उपक्रम्यस्य हि द्वित्वाद् द्विधैवोपक्रमो मतः ।

एकः सन्तर्पणस्तत्र द्वितीयश्चापतर्पणाः ॥

157. बृंहणो लङ्घनश्चेति तत्पर्यायावुदाहृतौ ।

बृंहणं यद् बृहत्त्वाय लङ्घनं लाघवाय यत् ॥

158. स्नेहनं रूक्षणं कर्म स्वेदनं स्तम्भनं च यत् ।

भूतानां तदपि द्वैध्याद् द्वितयं नातिवर्तते ॥

159. शोधनं शमनं चेति द्विधा तत्रापि लङ्घनम् ।

यदीरयेद्बहिर्दोषान् पञ्चधा शोधनं च यत् ॥

160. निरूहो वमनं कायशिरोरेकोऽस्रविस्रुतिः ।

न शोधयति यद्दोषान् समान्नोदीरयत्यपि ॥

161. समीकरोति विषमान् शमनं तच्च सप्तधा ।

पाचनं दीपनं क्षुत्तृड्व्यायामातपमारुताः ॥

162. न बृंहयेल्लङ्घनीयान् बृंह्यांस्तु मृदु लङ्घयेत् ।

युक्त्या वा देशकालादिबलतस्तानुपाचरेत् ॥

163. बृंहिते स्याद्बलं पुष्टिस्तत्साध्यामयसङ्क्षयः ।

विमलेन्द्रियता सर्गो मलानां लाघवं रुचिः ॥

164. क्षुत्तृट्सहोदयः शुद्धहृदयोद्गारकण्ठता ।

व्याधिमार्दवमुत्साहस्तन्द्रानाशश्च लङ्घिते ॥

165. अनपेक्षितमात्रादिसेविते कुरुतस्तु ते ।

अतिस्थौल्यातिकार्श्यादीन् वक्ष्यन्ते ते च सौषधाः ॥

166. अतिस्थौल्यापचीमेहज्वरोदरभगन्दरान् ।

कासस‍न्न्यासकृच्छ्रामकुष्ठादीनतिदारुणान् ॥

167. कार्श्यमेव वरं स्थौल्यान्न हि स्थूलस्य भेषजम् ।

बृंहण लङ्घनं वाऽलमतिमेदोग्निवातिजत् ॥

168. मधुरस्निग्धसौहित्यैर्यत्सौख्येन च नश्यति ।

क्रशिमा स्थविमाऽत्यन्तविपरीतनिषेवणैः ॥

169. अचिन्तया हर्षेण ध्रुवं सन्तर्पणेन च ।

स्वप्नप्रसङ्गाच्च कृशो वराह इव पुष्यति ॥

170. गुरु चातर्पणं स्थूले विपरीतं हितं कृशे ।

यवगोधूममुभयोस्तद्योग्याहितकल्पनम् ॥

171. हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।

मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥

172. कायवाग्बुद्धिविषया ये मलाः समुपस्थिताः ।

चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ॥

173. अथ मैत्रीपरः पुण्यमायुर्वेदं पुनर्वसुः ।

शिष्येभ्यो दत्तवान् षड्भ्यः सर्वभूतानुकम्पया ॥

174. अष्टांगसंग्रहे ज्ञाते वृथा प्राक्तन्त्रयोः श्रमः ।

अष्टांगसंग्रहेऽज्ञाते वृथा प्राक्तन्त्रयोः श्रमः ॥

175. तथा सिंहो मृगेन्द्राणां यथाऽनन्तो भुजङ्गमे ।

देवानां च यथा शम्भुस्तथाऽऽत्रेयोऽस्ति वैद्यके ॥

176. इह चत्वारि दानानि प्रोक्तानि परमर्षिभिः ।

विचार्य नानाशास्त्राणि शर्मणेऽत्र परत्र च ॥

भीतेभ्यश्चाभयं देयं, व्याधितेभ्यस्तथौषधम् ।

देया विद्यार्थिने विद्या, देयमन्नं क्षुधातुरं ॥

177. सन्ति दानान्यनेकानि किं तैस्तुच्छफलप्रदैः ।

अभीतिदानतुल्यं तु परमेकं न विद्यते ॥

178. सत्त्वं रजस्तम इति मानसाः स्युस्त्रयो गुणाः ।

तेषां गुणानां साम्यं यत्तदाहुः स्वस्थलक्षणम् ॥

179. समदोषः समाग्निश्च समधातुमलक्रियः ।

प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥

180. तुलभ्रमगुणाकर्षधनुराकर्षणादिभिः ।

आयामो विविधोऽङ्गानां व्यायाम इति कीर्तितः ॥

181. शनैर्रथः शनैः पन्थाः शनैः पर्वतमारुहेत् ।

शनैर्विद्या च धर्मश्च व्यायामश्च शनैः शनैः ॥

182. मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः

सत्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।

उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले

मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥

183. यावद् वायुः स्थितो देहे तावज्जीवनमुच्यते ।

मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् ॥

184. यथा सिंहो गजो व्याघ्रो भवेद् वश्यः शनैः शनैः ।

तथैव सेवितो वायुरन्यथा हन्ति साधकम् ॥

185. स्नानं नाम मनःप्रसादजननं दुःस्वप्नविध्वंसनं

शौचस्यायतनं मलापहरणं संवर्धनं तेजसः ।

रूपद्योतकरं रिपुप्रमंथनं कामाग्निसन्दीपनं

नारीणां च मनोहरं श्रमहरं स्नाने दशैते गुणाः ॥

186. न स्नानमाचरेद् भुक्त्वा नातुरो न महानिशि ।

न वासोभिः सहाजस्रं, नाविज्ञाते जलाशये ॥

187. अद्भिर्गात्राणि शुद्ध्यन्ति, मनः सत्येन शुद्ध्यति ।

विद्यातपोभ्यां भूतात्मा, बुद्धिर्ज्ञानेन शुद्ध्यति ॥

188. पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयम् ।

न हि तोयाद्विना वृत्तिः स्वस्थस्य व्याधितस्य वा ॥

189. अजीर्णे भेषजं वारि, जीर्णे वारि बलप्रदम् ।

भोजने चामृतं वारि, भोजनान्ते विषप्रदम् ॥

190. अन्नाद् भूतानि जायन्ते जातान्यन्नेन वर्धन्ते ।

अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते ॥

191. अद्यते विधिवत् भुक्तमत्ति भोक्तारमन्यथा ।

आयुष्यं स्वास्थ्यपदं पूर्वमन्यतैवेतरत् स्मृतम् ॥

192. को हि तुलामधिरोहति शुचिना सहजमधुरेण ।

तप्तं विकृतं मथितं तथापि यत्स्नेहमुद्गिरति ॥

193. कैलासे यदि तक्रमस्ति गिरिशः किं नीलकण्ठो भवेद्

वैकुण्ठे यदि कृष्णतामनुभवेदद्यापि किं केशवः ।

194. इन्द्रो दुर्भगतां क्षयं द्विजपतिर्लम्बोदरत्वं गणः

कुष्ठित्वं च कुबेरको दहनतामग्निश्च किं विन्दति ॥

195. प्राणाः प्राणभृतामन्नं तदयुक्त्या निहन्त्यसून् ।

विषं प्राणहरं तच्च युक्तियुक्तं रसायनम् ॥

196. आढ्यानां मांसपरमं मध्यानां गोरसोत्तमम् ।

तैलोत्तरं दरिद्राणां भोजनं भरतर्षभ ॥

197. भोजनान्ते च किं पेयं, जयन्तः कस्य वै सुतः ।

कथं विष्णुपदं प्रोक्तं, तक्रं शक्रस्य दुर्लभम् ॥

198. न भुञ्जीतोद्धृतस्नेहं, नातिसौहित्यमाचरेत् ।

नातिप्रगे नातिसायं, न सायं प्रातराशितः ॥

199. सुजीर्णमन्नं, सुविचक्षणः सुतः

सुशासिता स्त्री, नृपतिः सुसेवितः ।

सुचिन्त्य चोक्तं, सुविचार्य यत्कृतं

सुदीर्घकालेऽपि न याति विक्रियाम् ॥

200. विद्याघातो ह्यनभ्यासः स्त्रीणां घातः कुचैलता ।

व्याधीनां भोजनं जीर्णं, शत्रोर्घातः प्रपञ्चता ॥

201. मरुस्थल्यां यथा वृष्टिः, क्षुधार्ते भोजनं तथा ।

दरिद्रे दीयते दानं सफलं पाण्डुनन्दन ॥

202. व्यसनानन्तरं सौख्यं स्वल्पमप्यधिकं भवेत् ।

कषायरसमासाद्य स्वाद्वतीवाम्बु विद्यते ॥

203. अभ्यासेन कटुद्रव्यं भवत्यभिमतं मुने ।

अन्यस्मै रोचते निम्बमन्यस्मै मधु रोचते ॥

204. किन्तु मद्यं स्वभावेन तथैवान्नं तथा स्मृतम् ।

अयुक्तियुक्तं रोगाय युक्तियुक्तं यथाऽमृतम् ॥

205. न पश्यति जन्मान्धः कामान्धो नैव पश्यति ।

न पश्यति मदोन्मत्तो ह्यार्थी दोषान्न पश्यति ॥

206. कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ।

सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते ॥

207. स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।

सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥

208. एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।

विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥

209. आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम् ।

ज्ञानं हि तेषामधिको विशेषो ज्ञानेन हीनाः पशुभिः समानाः ॥

210. विषाद्विषं किं विषयाः समस्ताः दुःखी सदा को विषयानुरागी ।

धन्योऽस्ति को यस्तु परोपकारी कः पूजनीयः शिवतत्त्वनिष्ठः ॥

211. विषस्य विषयाणां च दूरमत्यन्तमन्तरम् ।

उपभुक्तं विषं हन्ति विषयाः स्मरणादपि ॥